THE

RATNÂVALÍ

OF

S'RÎHARSHADEVA.

EDITED BY

KÂS'ÎNÂTH PÂṆDURANG PARAB

AND

VIS'VANÂTH S'ÂSTRÎ JOS'Î.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1888.

Price 6 Annas.

Digitized by Google

Ind L 1206.8



(Registered according to act XXV of 1867.)

(All rights reserved by the publisher.)

Digitized by Google

महाकविश्रीहर्षदेवविरचिता

रत्नावली ।

काशीनाथ पाण्डुरङ्ग परब

विश्वनाथ शास्त्री जोशी

इत्येताभ्यां संस्कृता ।

सा च

शाके १८१० वत्सरे

मुम्बय्यां

निर्णयसागरयन्त्रालयाधिपतिना मुद्रिता ।

मूल्यं ६ आणकाः ।

Digitized by Google

सूचना.

रत्नावली नाटिकेची एक जीर्ण झालेली पोथी सुमारें तीनशें वर्षांमागें लिहिलेली डा० रामकृष्ण गोपाल भाण्डारकर यांनीं कृपा करून सरकारी पुस्तकसंग्रहांतून पाठवून दिली. तींत बहुत भाग फार शुद्ध असून पाठही उत्तम आढळले म्हणून त्याच पोथीचा आधार धरून ही प्रत तयार केली आहे. मधून मधून जेथें मूळ प्रतींत अशुद्धें आढळलीं तेथें इतर पोथ्यांतून पाठ घेतले आहेत.

---

१ "संवत् १६९४ वर्षे आषाढमासे शुक्लपक्षे द्वितीयायां तिथौ रविवासरे श्रीमत्कनोजग्रामनिवासिना भट्टहरजीसुतसुरजीकेन रत्नावलीनामनाटिकालेखि" असा पुस्तकान्तीं लेख आहे.

Digitized by Google

महाकविश्रीहर्षविरचिता

रत्नावली ।



प्रथमोऽङ्कः ।

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शंभोः सस्पृहलोचनत्रयपथं यात्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥ १ ॥

अपि च ।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥ २ ॥

अपि च ।

क्रोधेद्धैर्दृष्टिपातैर्मुहुरुपशमिता वह्नयोऽमी त्रयोऽपि
त्रासार्ता ऋत्विजोऽधश्चपलगणहतोष्णीषपट्टाः पतन्ति ।
दक्षः स्तौत्येष पत्नी प्रलपति कृपणं विद्रुतं देवि देवैः
शंसन्नित्यट्टहासैर्मखमथनविधौ पातु देव्याः शिवो वः ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिप्रसङ्गेन । अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः । यथा—'यासावस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृता रत्नावली नाम नाटिका कृतेत्यस्माभिः श्रोत्रपरम्परया श्रुता, न च प्रयोगतो दृष्टा । तत्तस्यैव राज्ञः सकल-

Digitized by Google

जनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्या' इति । तद्यावन्नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । आवर्जितानि च मया सामाजिकमनांसीति मे निश्चयः । कुतः ।

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादसौ समुदितः सर्वो गुणानां गणः ॥ ४ ॥

तद्यावद्गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । (परिक्रम्य । नेपथ्याभिमुखमवलोक्य ।) इदमस्मदीयं गृहम् । यावत्प्रविशामि । (प्रविश्य ।) आर्ये, इतस्तावत् ।

(प्रविश्य ।)

नटी—[1]अज्ज, इअम्हि । आणवेदु अज्जो को णिओओ अणुचिट्ठीअदि ।

सूत्रधारः—आर्ये, रत्नावलीदर्शनसमुत्सुकोऽयं राजलोकः । तद्गृह्यतां नेपथ्यम् ।

नटी— (सोद्वेगम् ।) [2]अज्ज, णिच्चिन्तो दाणिं सि तुमम् । कीस ण णच्चसि । मह उण एक्क ज्जेव दुहिदा । सावि तए कहंपि दूरदेसन्तरे दिण्णा । ता दूरट्ठिदेण भत्तुणा सह से कहं पाणिग्गहणं भविस्सदि, इमाए चिन्ताए अप्पावि मे ण पडिहादि । किं पुण णच्चिदव्वम् ।

---

१ आर्य, इयमस्मि । आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयताम् ।

२ आर्य, निश्चिन्त इदानीमसि त्वम् । कस्मान्न नृत्यसि । मम पुनरेकैव दुहिता । सापि त्वया कथमपि दूरदेशान्तरे दत्ता । तद्दूरस्थितेन भर्त्रा सहास्याः कथं पाणिग्रहणं भविष्यति, अनया चिन्तयात्मापि मे न प्रतिभाति । किं पुनर्नर्तितव्यम् ।

Digitized by Google

सूत्रधारः—दूरस्थितेनेत्यलमुद्वेगेन । पश्य ।
द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥ ९ ॥

(नेपथ्ये)

एवमेतत् । कः संदेहः । (द्वीपादन्यस्मादिति पठति ।)

सूत्रधारः—(आकर्ण्य । सहर्षम् ।) आर्ये, मम कनीयान्भ्राता गृहीतयौगन्धरायणभूमिकः प्राप्त एव । तदेहि । आवामपि नेपथ्यग्रहणाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशति यथानिर्दिष्टो यौगन्धरायणः ।)

यौगन्धरायणः—एवमेतत् । कः संदेहः । (द्वीपादन्यस्मादिति पठित्वा ।) अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे यानभङ्गमग्नोत्थितायाः फलहकासादनम्, क्व च कौशाम्बीयेन वणिजा सिंहलेभ्यः प्रत्यागच्छता तदवस्थायाः संभावनम्, स्वरत्नमालाचिह्नां च परिज्ञायेहानयनम् । सर्वथा स्पष्टशन्त्यस्मत्स्वामिनमभ्युदयाः । (विचिन्त्य ।) मयापि चैनां देवीहस्ते सगौरवं निक्षिपता युक्तमेवानुष्ठितम् । कथितं च मम—'बाभ्रव्योऽपि कञ्चुकी सह सिंहलेश्वरामात्येन वसुभूतिना कथं कथमपि समुद्रादुत्तीर्य कोशलोच्छित्तये गतस्य रुमण्वतो मिलितः' । तदेवं निष्पन्नप्रायमपि प्रयोजनं न मे धृतिमावहतीति । यतः । कष्टो भृत्यभावः ।

आरम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे ।
सिद्धे भ्रान्तिर्नास्ति सत्यं तथापि
स्वेच्छाचारी भीत एवास्मि भर्तुः ॥ १ ॥

Digitized by Google

(नेपथ्ये कलकलः ।)

यौगन्धरायणः—(आकर्ण्य ।) यथायमभिहन्यमानमृदुमृदङ्गानुगतगीतमधुरः पुरः पौराणां समुच्चरति चर्चरीध्वनिः, तथा तर्कयामि मदनमहमहीयांसं पुरजनप्रमोदमवलोकयितुं प्रासादाभिमुखं प्रस्थितो देवः । यदेष

विश्रान्तविग्रहकथो रतिमाञ्जनस्य
चित्ते वसन्प्रियवसन्तक एष साक्षात् ।
पर्युत्सुको निजमहोत्सवदर्शनाय
वत्सेश्वरः कुसुमचाप इवाभ्युपैति ॥ ७ ॥

(ऊर्ध्वमवलोक्य ।) कथमधिरूढ एव देवः प्रासादम् । अथ चेद्गृहं गत्वा कार्यशेषं चिन्तयामि । (इति निष्क्रान्तः ।)

विष्कम्भकः ।

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च ।)

राजा—(सानन्दम् ।) सखे वसन्तक ।

विदूषकः—[1]आणवेदु भवं ।

राजा—

राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यग्लालनपालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः ॥ ८ ॥

विदूषकः—[2]भो, एवं णेदम् । अहं पुण जाणामि, ण भवदो ण कामदेअस्स, मम ज्जेव एकस्स बम्भणस्स अअं मअणमहूसवो, जस्स

---

१ आज्ञापयतु भवान् ।

२ भोः, एवमेतत् । अहं पुनर्जानामि, न भवतो न कामदेवस्य, ममैवैकस्य ब्राह्मणस्यायं मदनमहोत्सवः, यस्य प्रियवयस्येनैवं मन्त्र्यते ।

Digitized by Google

पिअवअस्सेण एवं मन्तीअदि । ता किं इमिणा । पेक्ख दाव इमस्स महुमत्तकामिणीसअंगाहगहिदणच्चन्तणाअरजणजणिदकोदूहलस्स समन्तदो घुम्मन्तमद्दलुद्दामचच्चरीसद्दमुहररच्छामुहसोहिणो रजप्पइण्णपडवासपुञ्जपिञ्जरिज्जन्तदसदिसस्स ससिरिअत्तणं मअणमहूसवस्स ।

राजा—(समन्तादवलोक्य ।) अहो परां कोटिमधिरोहति प्रमोदः पौराणाम् । तथा हि ।

कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरै-
हैंमालंकारभाभिर्भरनमितशिरःशेखरैः कैङ्किरातैः ।
एषा वेषाभिलक्ष्यस्त्वविभवविजिताशेषवित्तेशकोशा
कौशाम्बी शातकुम्भद्रवखचितजनेवैकपीता विभाति ॥ ९ ॥

अपि च ।

धारायन्त्रविमुक्तसंततपयःपूरप्लुते सर्वतः
सद्यः सान्द्रविमर्दकर्दमकृतक्रीडे क्षणं प्राङ्गणे ।
उद्दामप्रमदाकपोलनिपतत्सिन्दूररागारुणं
सैन्दूरं क्रियते जनेन चरणन्यासैः पुनः कुट्टिमम् ॥ १० ॥

विदूषकः—भो वअस्स, इमं पि दाव सुविअड्ढविडजणोवहरिदसिङ्गकजलप्पहारमुक्कसिक्कारमणहरं वारविलासिणीविलसिदं अवलोएदु पिअवअस्सो ।

तत्किमनेन । पश्य तावदस्य मधुमत्तकामिनीस्वयंग्राहगृहीतनृत्यन्नागरजननजनितकुतूहलस्य समन्ततः शब्दायमानमर्दलोद्दामचर्चरीशब्दमुखररथ्यामुखशोभिनो रजःप्रकीर्णपटवासपुञ्जपिञ्जरीक्रियमाणदशदिशः सश्रीकत्वं मदनमहोत्सवस्य ।

१ भो वयस्य, इदमपि तावत्सुविदग्धविटजनोपहृतशृङ्गकजलप्रहारमुक्तसीत्कारमनोहरं वारविलासिनीविलसितमवलोकयतु प्रियवयस्यः ।

Digitized by Google

राजा—(समन्तादवलोक्य ।) वयस्य, साधु दर्शितम् ।

अस्मिन्प्रकीर्णपटवासकृतान्धकारे
दृष्टो मनाङ्मणिविभूषणरश्मिजालैः ।
पातालमुद्यतफणाकृतिशृङ्गकोऽयं
मामद्य संस्मरयतीह भुजङ्गलोकः ॥ ११ ॥

विदूषकः—(विलोक्य ।) भो, एसा क्खु मअणिआ मअवसविसंठुलं वसन्ताभिणअं णच्चन्ती चूअलदिआए सह इंदो जेव आअच्छदि[1] । ता अवलोएदु एदं पिअवअस्सो ।

(ततः प्रविशतो गृहीतवसन्तवेषोत्सवे द्विपदीखण्डं गायन्त्यौ चेट्यौ ।)

चेट्यौ—

कुसुमाउहपिअदूअअं[2] मउलावन्तो चूअअम् ।
सिढिलिअमाणग्गहणओ वाअदि दाहिणपवणओ ॥ १२ ॥
विअसिअबउलामोअओ कङ्खिअपिअअममेलओ ।
पडिबालणासमत्थओ तम्मइ जुवईसत्थओ ॥ १३ ॥

अअ पढमं महुमासो जणस्स हिअआइं कुणइ मुउआइं ।
पच्छा विन्धइ कामो लद्धप्पसरेहिं कुसुमबाणेहिं ॥ १४ ॥

राजा—(विलोक्य । सविस्मयम् ।) अहो निर्भरः क्रीडारसः ।

स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीबाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ ।

---

१ भोः, एषा खलु मदनिका मदवशविसंष्ठुलं वसन्ताभिनयं नृत्यन्ती चूतलतिकया सहेत एवागच्छति । तदवलोकयत्वेतां प्रियवयस्यः ।

२ कुसुमायुधप्रियदूतं मुकुलयंश्चूतम् ।
शिथिलितमानग्रहणो वाति दक्षिणपवनः ॥
विकसितबकुलामोदकः काङ्क्षितप्रियतममेलकः ।
प्रतिपालनासमर्थको ताम्यति युवतिसार्थकः ॥
इह प्रथमं मधुमासो जनस्य हृदयानि करोति मृदुलानि ।
पश्चाद्विध्यति कामो लब्धप्रसरैः कुसुमबाणैः ॥

Digitized by Google

व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीडन्त्याः पीडयैव स्तनभरविनमन्मध्यभङ्गानपेक्षम् ॥१९॥

विदूषकः—भो वअस्स, अहंपि एताणं मज्झे गदुअ णच्चन्तो मअणमहूसवं माणइस्सम् ।

राजा—वयस्य, एवं क्रि ताम् ।

विदूषकः—(उत्थाय चेट्योर्मध्ये नृत्यन् ।) भोदि मअणिए, भोदि चूअलदिए, मंपि एदं चच्चरिं सिक्खावेहि ।

उभे—(विहस्य ।) हैदास, ण क्खु एसा चच्चरी ।

विदूषकः—भोदि, किं खु एदं ।

मदनिका—दुवईखण्डं खु एदं ।

विदूषकः—भोदि, एदिणा खण्डेण किं मोदआ करीअन्दि ।

चेट्यौ—णहि णहि । पढीअइ खु एदं ।

विदूषकः—भोदि, पढीअइ जदि खु एदं ता मम अलं इमिणा । वअस्सस्स सआसमेव गमिस्सम् । (तथा करोति ।)

---

१ भो वयस्य, अहमप्येतयोर्मध्ये गत्वा नृत्यन्मदनमहोत्सवं मानयिष्यामि ।

२ भवति मदनिके, भवति चूतलतिके, मामप्येतां चर्चरीं शिक्षय ।

३ हताश, न खल्वेषा चर्चरी ।

४ भवति, किं खल्वेतत् ।

५ द्विपदीखण्डं खल्वेतत् ।

६ भवति, एतेन खण्डेन किं मोदकाः क्रियन्ते ।

७ नहि नहि । पठ्यते खल्विदम् ।

८ भवति, पठ्यते यदि खल्वेतत्तन्ममालमनेन । वयस्यस्य सकाशमेव गमिष्यामि ।

Digitized by Google

चेटी—[1]मअणिए, चिरं अम्हेहिं केलिदम् । ता एहि । णिवेदम्ह दाव भट्टिणीए संदेसं महाराअस्स ।

मदनिका—[2]सहि, एवं करिम्ह ।

उभे—(उपसृत्य ।) [3]जअदु जअदु भट्टा । भट्टा, देवी आणवेदि—(इत्यर्धोक्ते लज्जां नाटयन्त्यौ ।) णहि णहि । विण्णवेदि ।

राजा—(सानन्दम् ।) मदनिके, नन्वाज्ञापयतीत्येव रमणीयम्, विशेषतश्चाद्य मदनमहोत्सवे । तत्कथय किमाज्ञापयति देवी ।

उभे—(उपसृत्य ।) [4]यँह अज्ज मए मअरन्दोद्दाणे रत्तासोअपाअवतले संठिअस्स भअवदो कुसुमाउहस्स पूआ णिव्वत्तइदव्वा । तहिं अज्जउत्तेण संणिहिदेण होदव्वम् ।

राजा—(सानन्दम् ।) वयस्य, ननु वक्तव्यमुत्सवादुत्सवान्तरमापतितमिति ।

विदूषकः—[5]भो, उट्ठेहि । लहुं गच्छम्ह । तहिं पि दाव गदस्स मे बम्भणस्स सत्थिवाअणकं भविस्सदि ।

राजा—मदनिके, गम्यतां देव्यै निवेदयितुम् । अहमागत एव मकरन्दोद्यानम् ।

---

१ मदनिके, चिरमावाभ्यां क्रीडितम् । तदेहि । निवेदयावस्तावद्भर्त्र्याः संदेशं महाराजाय ।

२ सखि, एवं कुर्वः ।

३ जयतु जयतु भर्ता । भर्तः, देव्याज्ञापयति । नहि नहि । विज्ञापयति ।

४ यथाद्य मया मकरन्दोद्याने रक्ताशोकपादपतले संस्थितस्य भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या । तत्रार्यपुत्रेण संनिहितेन भवितव्यम् ।

५ भोः, उत्तिष्ठ । लघु गच्छावः । तत्रापि तावद्गतस्य मे ब्राह्मणस्य स्वस्तिवायनं भविष्यति ।

Digitized by Google

उभे—[1]जं आणवेदित्ति । (निष्क्रान्ते ।)

राजा—वयस्य, तदादेशय मार्गं मकरन्दोद्यानस्य ।

विदूषकः—[2]जं भट्टा आणवेदि । एदु एदु भवं ।

(परिक्रामतः ।)

विदूषकः—(अग्रतो विलोक्य ।) [3]भो भो, एदं मअरन्दोद्दाणम् । ता पविसदु भवं ।

(प्रवेशं नाटयतः ।)

विदूषकः—(दृष्ट्वा । सविस्मयम् ।) [4]भो महाराअ, पेक्ख पेक्ख । एदं खु तं मलअमारुदन्दोलणपहुल्लन्तसहआरमञ्जरीरेणुपटलपडिबद्धपडवितानं मत्तमहुअरमुत्तझङ्कारमिलिदमहुरकोइलारावसंगीअसुदिसुहं तुहागमणबहुमानदंसितादरं विअ मअरन्दुद्दाणं लक्खीअदि । ता पेक्खदु भवं ।

राजा—(समन्तादवलोक्य ।) अहो रम्यता मकरन्दोद्यानस्य । इह हि

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलायितः ।
घूर्णन्तो मलयानिलाहतिचलैः शाखासमूहैर्मुहु-
र्भ्रान्तिं प्राप्य मधुप्रसङ्गजनितां मत्ता इवामी द्रुमाः ॥१६॥

---

१ यदाज्ञापयतीति ।

२ यद्भर्ताज्ञापयति । एत्वेतु भवान् ।

३ भो भोः, इदं मकरन्दोद्यानम् । तत्प्रविशतु भवान् ।

४ भो महाराज, पश्य पश्य । एतत्खलु तन्मलयमारुतान्दोलनप्रफुल्लत्सहकारमञ्जरीरेणुपटलप्रतिबद्धपटवितानं मत्तमधुकरमुक्तझङ्कारमिलितमधुरकोकिलारावसंगीतश्रुतिसुखं तवागमनबहुमानदर्शितादरमिव मकरन्दोद्यानं लक्ष्यते । तत्पश्यतु भवान् ।

Digitized by Google

अपि च ।

मूले गण्डूषसेकासव इव बकुलैर्वास्यते पुष्पवृष्ट्या
मध्वाताम्रे तरुण्या मुखशशिनि चिराच्चम्पकान्यद्य भान्ति ।
आकर्ण्याशोकपादाहतिषु च रसितं निर्भरं नूपुराणां
झङ्कारस्यानुगीतैरनुरणनमिवारभ्यते भृङ्गसार्थैः ॥ १७ ॥

विदूषकः—भो[1], ण एदे महुअरा णेउरणिग्घोसमणुकरन्ति । णेउरसद्दो जेव एसो देवीपरिअणस्स ।

राजा—वयस्य, सम्यगवधार्यताम् ।

(ततः प्रविशति वासवदत्ता, काञ्चनमाला, विभवतश्च परिवारः ।)

वासवदत्ता—कञ्चणमाले[2], अध के दूरे दाणिं सो रत्तासोअपादवो जहिं मए भअवदो कुसुमाउहस्स पूआ णिव्वत्तइदव्वा ।

काञ्चनमाला—भट्टिणि[3], आसण्णो जेव किं न पेक्खदि भट्टिणी । इअं क्खु दाणिं निरन्तरुब्भिण्णकुसुमसोहिणी भट्टिणीए परिग्गिहिदा माहवीलदा । एसा वि अवरा णोमालिआ, जीए कदे अकालकुसुमसद्धालुणा भट्टिणा अणुदिअहं अप्पा आआसीअदि । ता एदु एदु देवी ।

(इति परिक्रामन्ति ।)

---

१ भोः, नैते मधुकरा नूपुरनिर्घोषमनुकुर्वन्ति । नूपुरशब्द एवैष देवीपरिजनस्य ।

२ काञ्चनमाले, अथ कियद्दूर इदानीं स रक्ताशोकपादपो यत्र मया भगवतः कुसुमायुधस्य पूजा निर्वर्तयितव्या ।

३ भर्त्रि, आसन्न एव किं न पश्यति भर्त्री । इयं खल्विदानीं निरन्तरोद्भिन्नकुसुमशोभिनी भर्त्र्या परिगृहीता माधवीलता । एषाप्यपरा नवमालिका, यस्याः कृतेऽकालकुसुमश्रद्धालुना भर्त्रानुदिवसमात्मायास्यते । तदेत्वेतु देवी ।

Digitized by Google

काञ्चनमाला—[1]भट्टिणि, अअं खु सो रत्तासोअपाअवो जहिं देवी पूआं णिव्वत्तइस्सदि ।

वासवदत्ता—[2]तेण हि मे पूआणिमित्तं उवणेहि उवअरणाइं ।

सागरिका—[3]भट्टिणि, इदं सव्वं सज्जम् ।

वासवदत्ता—(निरूप्य । आत्मगतम् ।) [4]अहो पमाओ मे परिअणस्स । जस्स ज्जेव दंसणपधादेव इअं पअत्तेण रक्खीअदि, तस्स ज्जेव कहंपि दिट्ठिगोअरं गदा । ता भोदु । एवं ताव भणिस्सम् । (प्रकाशम् ।) हञ्जे साअरिए, कीस तुमं मअपराहीणपरिअणे इमस्सिं मअणमहूसवे साारिअं मोत्तूण इहागदा । ता लहुं तहिं ज्जेव गच्छ । एअं च सव्वं कञ्चणमालाए समप्पेहि ।

सागरिका—[5]जं भट्टिणी आणवेदि । (काञ्चनमालाया अर्पयित्वा । कतिचित्पदानि दत्त्वा । आत्मगतम् ।) सारिआ दाव मए सुसंगदाए समप्पिदा । पेक्खिदुं च अत्थि मे कोदूहलं किं जहा तादस्स अन्तेउरे भअवं अणङ्गो अच्चीअदि, इह वि तह ज्जेव आदु अण्णहत्ति । ता

---

१ भर्त्रि, अयं खलु स रक्ताशोकपादपो यत्र देवी पूजां निर्वर्तयिष्यति ।

२ तेन हि मे पूजानिमित्तमुपनयोपकरणानि ।

३ भर्त्रि, इदं सर्वं सज्जम् ।

४ अहो प्रमादो मे परिजनस्य । यस्यैव दर्शनपथादेवेयं प्रयत्नेन रक्ष्यते, तस्यैव कथमपि दृष्टिगोचरं गता । तद्भवतु । एवं तावद्भणिष्यामि । हञ्जे सागरिके, किं त्वं मदपराधीनपरिजनेऽस्मिन्मदनमहोत्सवे सारिकां मुक्त्वेहागता । तल्लघु तत्रैव गच्छ । एतच्च सर्वं काञ्चनमालायै समर्पय ।

५ यद्भर्त्र्याज्ञापयति । सारिका तावन्मया सुसंगतायै समर्पिता । प्रेक्षितुं चास्ति मे कुतूहलं किं यथा तातस्यान्तःपुरे भगवाननङ्गोऽर्च्यते,

Digitized by Google

अलक्खिद एव्व पेक्खिस्सम् । जाव पूआसमओ होइ, ता अहं पि मअणं जेव समच्चिदुं कुसुमाइं अवचिस्सम् ।

काञ्चनमाला—[1]जं भट्टिणी आणवेदि । (तथा करोति ।)

विदूषकः—[2]भो वअस्स, जधा परिसन्तो णेउररवो तहा तक्केमि संपत्ता देवी असोअपाअवसमीपे ।

राजा—(दृष्ट्वा ।) वयस्य, इयं देवी यैषा

कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम् ।
आभाति मकरकेतोः पार्श्वस्था चापयष्टिरिव ॥ १८ ॥

तदेहि । उपसर्पावः । (उपसृत्य ।) प्रिये वासवदत्ते ।

वासवदत्ता—[3]अम्मो अज्जउत्तो । जअदु जअदु अज्जउत्तो ।

काञ्चनमाला—[4]भट्टिणि, सहत्थदिण्णकुङ्कुमच्चिआसोहिदं कदुअ रत्तासोअपाअवं अच्चीअदु भअवं पहुण्णो ।

वासवदत्ता—[5]उवणेहि मे उवअरणाइं ।

(काञ्चनमालोपनयति । वासवदत्ता तथा करोति ।)

राजा—प्रिये,

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपिप्रभवा लतेव ॥ १९ ॥

इहापि तथैवाथवान्यथेति । तदलक्षितैव द्रक्ष्यामि । यावत्पूजासमयो भवति, तदहमपि मदनमेव समर्चितुं कुसुमान्यवचेष्यामि ।

१ यद्भट्टर्याज्ञापयति ।

२ भो वयस्य, यथा परिश्रान्तो नूपुररवस्तथा तर्कयामि संप्राप्ता देव्यशोकपादपसमीपे ।

३ अहो आर्यपुत्रः । जयतु जयत्वार्यपुत्रः ।

४ भार्त्रि, स्वहस्तदत्तकुङ्कुमचर्चिकाशोभितं कृत्वा रक्ताशोकपादपमर्च्यतां भगवान्प्रद्युम्नः ।

५ उपनय म उपकरणानि ।

Digitized by Google

अपि च ।

स्पृष्टस्त्वयैष दयिते स्मरपूजाव्यावृतेन हस्तेन ।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः ॥ २० ॥

अपि च ।

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम् ।
यदनेन न संप्राप्तः पाणिस्पर्शोत्सवस्तव ॥ २१ ॥

काञ्चनमाला—भट्टिणि,[1] करोहि भत्तुणो समुइदं पूआसक्कारम् ।

(वासवदत्ता राजानं पूजयति । सर्वे उपविशन्ति ।)

सागरिका— (गृहीतकुसुमा ।) अम्हो,[2] कुसुमलोहखित्तहिअआए अदिचिरं जेव्व मए कदम् । ता जाव इमिणा सिन्दुवारविडवन्तरेण पेक्खिस्सम् । (दृष्ट्वा । सविस्मयम् ।) कहं पच्चक्खो एव्व भअवं कुसुमाउहो इह पूआं पडिच्छदि । ता अहं पि इहत्थिद एव्व इमेहिं कुसुमेहिं भअवन्दं पूअइस्सम् । णमो दे भअवं कुसुमाउह, अमोहदंसणो दाणिं मे भवेहि । (पुष्पाणि क्षिपति ।) दिट्ठं जं पेक्खिदव्वम् । ता जाव ण को वि मं पेक्खदि ताव तुरिदं गमिस्सम् । (परावृत्य पदद्वयं ददाति ।)

(नेपथ्ये वैतालिकः पठति ।)

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा-
वास्थानीं समये समं नृपजनः सायंतने संपतन् ।
संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं
प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ॥ २२ ॥

---

१ भर्त्रि, कुरु भर्तुः समुचितं पूजासत्कारम् ।

२ अहो, कुसुमलोभक्षिप्तहृदययातिचिरमेव मया कृतम् । तद्यावदनेन सिन्दुवारविटपान्तरेण द्रक्ष्यामि । कथं प्रत्यक्ष एव भगवान्कुसुमायुध इह पूजां प्रतीच्छति । तदहमपीहस्थितैर्वैभिः कुसुमैर्भगवन्तं पूजयिष्यामि । नमस्ते भगवन्कुसुमायुध, अमोघदर्शन इदानीं मे भव । दृष्टं यद्द्रष्टव्यम् । तद्यावन्न कोऽपि मां पश्यति तावत्त्वरितं गमिष्यामि ।

Digitized by Google

सागरिका—(परिवृत्य । सहर्षं राजानं पश्यन्ती ।) कधं[1] अअं सो राआ उदअणो जस्स अहं तादेण दिण्णा । ता परपोसणदूसिदं पि मे जीविदं एदस्स दंसणेण बहुमतं संवुत्तम् ।

राजा—अये, कथमुत्सवापहृतचेतोभिः संध्यातिक्रमोऽप्यस्माभिर्न परिकल्पितः । संप्रति परिणतमहः । देवि, पश्य ।

उदयपटान्तरितमियं प्राची सूचयति दिङ्निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ २३ ॥

देवि, तदुत्तिष्ठ । अभ्यन्तरमेव प्रविशावः ।

सागरिका—(राजानं सस्पृहं दृष्ट्वा । निःश्वस्य ।) कधं[2] गदा देवी । ता तुरिदं एव्व गमिस्सम् । णं मए मन्दभाअधेआए चिरं पेक्खिदुमपि न पारिदम् । (इति निष्क्रान्ता ।)

राजा—(परिक्रामन् ।)

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ।
श्रुत्वा त्वत्परिवारवारवनितागीतानि भृङ्गाङ्गना
लीयन्ते कुसुमान्तरेषु शनकैः संजातलज्जा इव ॥ २४ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति रत्नावलीनामप्रधाननाटिकायां प्रथमोऽङ्कः ।

---

१ कथमयं स राजा उदयनो यस्याहं तातेन दत्ता । तत्परपोषणदूषितमपि मे जीवितमेतस्य दर्शनेन बहुमतं संवृत्तम् ।

२ कथं गता देवी । तत्त्वरितमेव गमिष्यामि । ननु मया मन्दभागधेयया चिरं द्रष्टुमपि न पारितम् ।

Digitized by Google

द्वितीयोऽङ्कः ।

(ततः प्रविशति गृहीतपञ्जरहस्ता सुसंगता ।)

सुसंगता—हद्धी[1] हद्धी । कहिं पुण मे हत्थे सारिआपञ्जरं णिक्खिविअ गदा पिअसही सागरिआ भविस्सदि । ता काहिं पुण एणं पेक्खिस्सम् । (अग्रतो निरूप्य ।) कहं एसा खु णिउणिआ इदो ज्जेव आअच्छदि । ता एअं पडिवालिअ पुच्छिस्सम् ।

(ततः प्रविशति निपुणिका ।)

निपुणिका—(सविस्मयम् ।) अच्छरिअं[2] अच्छरिअं । अणण्णसदिसो पभावो मण्णे देवदाए । उवलद्धो खु मए भट्टिणो वुत्तन्तो । गदुअ जाव भट्टिणीए णिवेदइस्सम् । (इति परिक्रामति ।)

सुसंगता—हला[3] णिउणिए, कहिं दाणिं तुमं गुरुअविम्हअक्खित्तहिअआ विअ मं अवधीरिअ इदो अदिक्कामसि ।

निपुणिका—कधं[4] सुसंगदा । हला सुसंगदे, सुट्ठु दे जाणिदं विम्हअस्स कारणम् । अज्ज भट्टा सिरिपव्वतादो आगदस्स खण्डदासणामधेअस्स धम्मिअस्स सआसादो अकालकुसुमसंजणणदो-

---

१ हा धिक् हा धिक् । कुत्र पुनर्मम हस्ते सारिकापञ्जरं निक्षिप्य गता प्रियसखी सागरिका भविष्यति । तत्क पुनरेनां प्रेक्षिष्ये । कथमेषा खलु निपुणिकेत एवागच्छति । तदेनां प्रतिपाल्य प्रक्ष्यामि ।

२ आश्चर्यमाश्चर्यम् । अनन्यसदृशः प्रभावो मन्ये देवतायाः । उपलब्धः खलु मया भर्तुर्वृत्तान्तः । गत्वा यावद्भट्टिन्यै निवेदयिष्यामि ।

३ सखि निपुणिके, केदानीं त्वं गुरुविस्मयक्षिप्तहृदयेव मामवधीर्येतोऽतिक्रामसि ।

४ कथं सुसंगता । सखि सुसंगते, सुष्ठु त्वया ज्ञातं विस्मयस्य कारणम् । अद्य भर्ता श्रीपर्वतादागतस्य खण्डदासनामधेयस्य धार्मिकस्य

Digitized by Google

हलअं सिक्खिअ तेण अत्तणो पडिगिहीदं णोमालिअं कुसुमसमिद्धिसोहिदं करिस्सदि । ता तुमं दाणिं कहिं पत्थिदा ।

सुसंगता—सहि[1], पिअसहिं सागरिअं अण्णेहिदुम् ।

निपुणिका—सहि[2], दिट्ठा दिट्ठा मए सागरिआ गहिदफलहकवत्तिआसमुग्गआ कदलीहरअं पविसन्ती । ता गच्छ तुमम् । अहं पि देवीए सआसं एव्व गच्छामि ।

(निष्क्रान्ते ।)

प्रवेशकः ।

(ततः प्रविशत्युपविष्टा मदनावस्थां नाटयन्ती सागरिका ।)

सागरिका—(निःश्वस्य ।) हिअअ[3], पसीद पसीद । किं इमिणा आआसमित्तफलेण दुल्लहजणप्पत्थणाणुबन्धेण । अण्णं च । जेण एव्व दिट्ठेण अअं ईदिसो संतावो, तं एव्व पुणो वि पेक्खिदुं अहिलससित्ति अहो दे मूढदा । कहं अ अदिनिसंस, जम्मदो पहुदि सहसंवड्ढिदं मं परिच्चइअ खणमित्तदंसणपरिचिदं अण्णं जणं गच्छन्तो ण लज्जसि । अहवा अणङ्गसरखण्डणभीदेण तए एदं अज्जव-

---

सकाशादकालकुसुमसंजननदोहदं शिक्षित्वा तेनात्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धिशोभितां करिष्यति । तत्त्वमिदानीं क्व प्रस्थिता ।

१ सखि, प्रियसखीं सागरिकामन्वेष्टुम् ।

२ सखि, दृष्टा दृष्टा मया सागरिका गृहीतफलहकवर्तिकासमुद्गका कदलीगृहं प्रविशन्ती । तद्गच्छ त्वम् । अहमपि देव्याः सकाशमेव गच्छामि ।

३ हृदय, प्रसीद प्रसीद । किमनेनायासमात्रफलेन दुर्लभजनप्रार्थनानुबन्धेन । अन्यच्च । येनैव दृष्टेनायमीदृशः संतापः, तमेव पुनरपि प्रेक्षितुमभिलषसीत्यहो ते मूढता । कथं चातिनृशंस, जन्मतः प्रभृति सहसंवर्धितं मां परित्यज्य क्षणमात्रदर्शनपरिचितमन्यं जनं गच्छन्न लज्जसे । अथवानङ्गशरखण्डनभीतेन त्वयेदमध्यवसि-

Digitized by Google

सिदम् । (सास्रा ।) भअवं कुसुमाउह, निज्जिअसुरासुरो भविअ इत्थीजणे पहरन्तो ण लज्जसि । सव्वहा मरणं एव्व मे इमिणा णिमित्तेण उवत्थिदम् । ता जाव ण को वि इह आअच्छदि, ताव आलेक्खगदं वि तं जणं कदुअ जहासमीहिदं करइस्सम् । जइ वि मे अदिसद्धसेण वेवादि अअं अग्गहत्थो, तहा वि णत्थि तस्स अण्णो दंसणोवाओत्ति तं जहातहा आलिहिस्सम् । (नाट्येन लिखति ।)

(ततः प्रविशति सुसंगता ।)

सुसंगता—एदं तं कदलीहरअम् । ता पविसामि । (प्रवेशं नाटयति । अग्रतो विलोक्य ।) एसा मे पिअसही साआरिआ । अध पुण एसा गुरुअराणुराअखिन्नहिअआ आलिहन्ती ण मं पेक्खदि । भोदु भोदु । दिट्ठिपहं से परिहरिअ णिरूवइस्सम् । (स्वैरं पृष्ठतोऽस्याः स्थित्वा पश्यति ।) कहं भट्टा आलिहिदो । साधु साआरिए, साधु । अहवा ण कमलाअरं वज्जिअ राअहंसी अण्णहिं अभिरमदि ।

तम् । भगवन्कुसुमायुध, निर्जितसुरासुरो भूत्वा स्त्रीजने प्रहरन्न लज्जसे । सर्वथा मरणमेव मेऽनेन निमित्तेनोपस्थितम् । तद्यावन्न कोऽपीहागच्छति, तावदालेख्यगतमपि तं जनं कृत्वा यथासमीहितं कारिष्यामि । यद्यपि मेऽतिसाध्वसेन वेपतेऽयमग्रहस्तः, तथापि नास्ति तस्यान्यो दर्शनोपाय इति तं यथातथालिखिष्यामि ।

१ एतत्तत्कदलीगृहम् । तत्प्रविशामि । एषा मे प्रियसखी सागरिका । अथ पुनरेषा गुरुतरानुरागखिन्नहृदयालिखन्ती न मां पश्यति भवतु भवतु । दृष्टिपथमस्याः परिहृत्य निरूपयिष्यामि । कथं भर्तालिखितः । साधु सागरिके, साधु । अथवा न कमलाकरं वर्जयित्वा राजहंस्यन्यत्राभिरमते ।

Digitized by Google

सागरिका—[1]आलिहिदो खु मए एसो । किं पुण णिवडन्तबाहसलिला दिट्ठी ण मे पेक्खिदुं पभवति । (मुखमुत्तानीकृत्याभूणि विधारयन्ती सुसंगतां दृष्ट्वोत्तरीयेण फलहकं प्रच्छादयन्ती सविलक्षस्मितम् ।) [2]कहं पिअसही सुसंगदा । सहि, उवविश ।

सुसंगता—(उपविश्य । आत्मगतम् ।) [3]कहं मं पेक्खिअ फलहगो छादितो । एवं ताव । (प्रकाशम् ।) सहि, दंसहि । को उण एसो तए एत्थ आलिहिदो ।

सागरिका—(विचिन्त्य फलहकं दर्शयन्ती ।) [4]सहि, पउत्ते मअणमहूसवे भअवं अणङ्गो ।

सुसंगता—(सस्मितम् ।) [5]अहो दे णिउणत्तणम् । किं पुण सुण्णं विअ एदं चित्तं पेक्खामि । ता अहं पि एदं आलिहिअं रतिसणाहं करिस्सम् । (फलहकं गृहीत्वा नाट्येन लिखति ।)

सागरिका—(सासूयम् ।) [6]सहि, कीस तए अहं इत्थ आलिहिदा ।

सुसंगता—(विहस्य ।) [7]सहि, मा कुप्प मा कुप्प । जादिसो तए अअं कामएवो आलिहिदो, मए तादिसी रइत्ति । ता असब्भाविणि, किं इमिणा । कहेहिं दाव एदं वुत्तन्तम् ।

---

१ आलिखितः खलु मयैषः । किं पुनर्निपतद्बाष्पसलिला दृष्टिर्न मे द्रष्टुं प्रभवति । कथं प्रियसखी सुसंगता । सखि, उपविश ।

२ कथं मां दृष्ट्वा फलहकश्छादितः । एवं तावत् । सखि, दर्शय । कः पुनरेष त्वयात्रालिखितः ।

३ सखि, प्रवृत्ते मदनमहोत्सवे भगवाननङ्गः ।

४ अहो ते निपुणत्वम् । किं पुनः शून्यमिवैताच्चित्रं पश्यामि । तदहमप्येतदालिखितं रतिसनाथं करिष्यामि ।

५ सखि, कस्मात्त्वयाहमत्रालिखिता ।

६ सखि, मा कुप्य मा कुप्य । यादृशस्त्वयायं कामदेव आलिखितः, मया तादृशी रतिरिति । तदसद्भाविनि, किमनेन । कथय तावदेतं वृत्तान्तम् ।

Digitized by Google

सागरिका—[1]तं जाणिदं जेव पिअसहीए । (सुसंगतां हस्ते गृहीत्वा । सास्रम् ।) सहि, महदी खु मे लज्जा । ता तहा करेसि जहा ण को वि अवरो एदं वुत्तन्तं जाणेदि ।

सुसंगता—[2]सहि, मा लज्ज । ईदिसस्स कण्णआरअणस्स अवस्सं एव्व ईदिसे वरे अहिलासेण होदव्वम् । ता ण को वि अवरो एदं जाणिस्सदि । किं पुण एदाए मेधाविणीए सारिआए सङ्कितव्वम् । कदा वि एसा इमस्स आलावस्स गहिदत्था भविअ कस्स वि पुरओ मन्तइस्सदि ।

सागरिका—[3]ता किं दाणिं इत्थ करइस्सम् । अहिअदरं मे संतावो बाधेदि । (मदनावस्थां नाटयति ।)

सुसंगता—(हृदये हस्तं दत्त्वा ।) [4]सहि, समस्सस समस्सस । जाव इमाओ दिग्घिआओ णलिणीवत्ताइं मुणालिआओ अ गिण्हिअ लहुं आअच्छामि । (परिक्रम्य तथा कृत्वा नलिनीपत्रैरास्तरणं रचयित्वा सागरिकाया हृदये तानि दत्त्वा ।) समस्सदु समस्सदु पिअसही ।

सागरिका—(तानि क्षिपन्ती ।) [5]ता सहि, अवणेहि मे णलिणी-

---

१ तज्ज्ञातमेव प्रियसख्या । सखि, महती खलु मे लज्जा । तत्तथा कुरुष्व यथा न कोऽप्यपर एतं वृत्तान्तं जानाति ।

२ सखि, मा लज्जस्व । ईदृशस्य कन्यारत्नस्यावश्यमेवेदृशे वरेऽभिलाषेण भवितव्यम् । तन्न कोऽप्यपर एतज्ज्ञास्यति । किं पुनरेतया मेधाविन्या सारिकया शङ्कितव्यम् । कदाप्येषास्यालापस्य गृहीतार्था भूत्वा कस्यापि पुरतो मन्त्रयिष्यति ।

३ तत्किमिदानीमत्र करिष्यामि । अधिकतरं मे संतापो बाधते ।

४ सखि, समाश्वसिहि समाश्वसिहि । यावदस्या दीर्घिकाया नलिनीपत्राणि मृणालिकाश्च गृहीत्वा लघ्वागच्छामि । समाश्वसितु समाश्वसितु प्रियसखी ।

५ तत्सखि, अपनय मे नलिनीपत्राणि मृणालिकाश्च । एतैरकारण आत्मानं सखि, किमायासयसि । अन्यद्गृणामि ।

Digitized by Google

वत्ताइं मुणालिआओ अ । एदेहिं अआरणे अत्ताणअं सहि, किं आआसेसि । अण्णं भणामि ।

दुल्लहजणाणुराओ लज्जा गुरई परव्वसो अप्पा ।
पिअसहि विसमं पिम्मं मरणं सरणं न वरमिक्कम् ॥ १ ॥

(भूमौ पतति ।)

सुसंगता—सहि, समस्सस समस्सस ।

(नेपथ्ये ।)

कण्ठे कृत्वावशेषं कनकमयमधः शृङ्खलादाम कर्ष-
न्क्रान्त्वा द्वाराणि हेलाचलचरणरणत्किंकिणीचक्रवालः ।
दत्तात्तङ्कोऽङ्गनानामनुसृतसरणिः संभ्रमादश्वपालैः
प्रधृष्टोऽयं प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः ॥ २ ॥

(पुनस्तत्रैव ।)

नष्टं वर्षधरैर्मनुष्यगणनाभावादकृत्वा त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥ ३ ॥

सुसंगता—(आकर्ण्यावलोक्य च ससंभ्रमं समुत्थाय सागरिकां हस्ते गृहीत्वा ।) सहि, उट्ठेहि उट्ठेहि । एसो खु दुट्ठवाणरो इदो जेव आअच्छदि । ता अलक्खिदं तमालविडवान्धआरे पविसिअ इमं अइवाहेम ।

(तथा कृत्वा सभयं पश्यन्त्यौ तिष्ठतः ।)

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं न वरमेकम् ॥

१ सखि, समाश्वसिहि समाश्वसिहि ।

२ सखि, उत्तिष्ठोत्तिष्ठ । एष खलु दुष्टवानर इत एवागच्छति । तदलक्षितं तमालविटपान्धकारे प्रविश्यैनमतिवाहयावः ।

Digitized by Google

सागरिका—[1]सुसंगदे, कहिं सो चित्तफलहओ उज्जिदो । मा कदावि कोपि तं पेक्खिस्सदि ।

सुसंगता—[2]अइ सुत्थिदे, अज्ज वि चित्तफलहं गेण्हीअ एसो खु दहिभत्तलम्पडदाए सारिआपञ्जरं उग्घाडिअ अवक्कन्दो दुट्ठवाणरो । मेहाविणी वि उड्डीणा एसा गच्छदि । ता लहुं एहि । अणुसरम्ह ।

(इति निष्क्रान्ते ।)

(नेपथ्ये ।)

[3]ही ही भो, अच्चरिअं अच्चरिअम् ।

सागरिका—(सभयम् ।) [4]सुसंगदे, णं सुणीअदि पुणो वि सो दुट्ठवाणरो आगदोत्ति ।

सुसंगता—(विदूषकं दृष्ट्वा सबहुमानं विहस्य ।) [5]अइ काअरे, मा भेहि । भत्तुणो पासवत्ती वसन्तओ खु एसो ।

सागरिका—(सस्पृहमवलोक्य ।) [6]सहि सुसंगदे, दंसणीओ क्खु अअं जणो ।

---

१ सुसंगते, कुत्र स चित्रफलहक उज्झितः । मा कदापि कोऽपि तं द्रक्ष्यति ।

२ अयि सुस्थिते, अद्यापि चित्रफलकं गृहीत्वैष खलु दधिभक्तलम्पटतया सारिकापञ्जरमुद्घाटयापक्रान्तो दुष्टवानरः । मेधाविन्यप्युड्डीनैषा गच्छति । तल्लघेहि । अनुसरावः ।

३ ही ही भोः, आश्चर्यमाश्चर्यम् ।

४ सुसंगते, ननु श्रूयते पुनरपि स दुष्टवानर आगत इति ।

५ अयि कातरे, मा बिभीहि । भर्तुः पार्श्ववर्ती वसन्तकः खल्वेषः ।

६ सखि सुसंगते, दर्शनीयः खल्वयं जनः ।

Digitized by Google

सुसंगता—अइ सुत्थिदे, किं इमिणा दिट्ठेण । दूरे ण भोदि खु सारिआ । ता एहि । अणुसरम्ह ।

(उभे निष्क्रान्ते ।)

(ततः प्रविशति पटाक्षेपेण प्रहृष्टो विदूषकः ।)

विदूषकः—[२]ही ही भो, अच्चरिअं अच्चरिअम् । साहु रे खण्डदासणाम धम्मिअ, साहु । जेण दिण्णमित्तेण जेव तेण दोहलएण ईदिसी सा णोमालिआ लदा संवुत्ता । जेण निरन्तरुब्भिण्णकुसुमच्छदा इअं विडवादो उपहसन्ती विअ तं देवीए परिगिहीदं माधवीलदं लक्खिअदि । ता जाव गदुअ पिअवअस्सं वद्धावइस्सम् । (परिक्रम्य । अग्रतो दृष्ट्वा ।) एसो क्खु पिअवअस्सो तस्स जेव दोहदस्स लद्धपच्चअदाए परोक्खं पि तं णोमालिअं पच्चक्खं पि च कुसुमिदं पेक्खिदुं दोहलरसोप्फुल्ललोअणो इदो जेव आअच्छदि । ता जाव णं उवसप्पामि ।

(ततः प्रविशति राजा ।)

राजा—(सहर्षम् ।)

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भेक्षणा-
दायासं श्वसनोद्गमैरविरतैरातन्वतीमात्मनः ।

---

१ अयि सुस्थिते, किमनेन दृष्टेन । दूरे न भवति खलु सारिका । तदेहि । अनुसरावः ।

२ ही ही भोः, आश्चर्यमाश्चर्यम् । साधु रे खण्डदासनामन् धार्मिक, साधु । येन दत्तमात्रेणैव तेन दोहदेनेदृशी सा नवमालिका लता संवृत्ता । येन निरन्तरोद्भिन्नकुसुमच्छदेयं विटपादुपहसन्तीव तां देव्या परिगृहीतां माधवीलतां लक्ष्यते । तद्यावद्गत्वा प्रियवयस्यं वर्धयिष्यामि । एष खलु प्रियवयस्यस्तस्यैव दोहदस्य लब्धप्रत्ययतया परोक्षामपि तां नवमालिकां प्रत्यक्षामपि च कुसुमितां प्रेक्षितुं दोहदरसोत्फुल्ललोचन इत एवागच्छति । तद्यावदेनमुपसर्पामि ।

Digitized by Google

अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन्कोपविपाटलद्युति मुखं तस्याः करिष्याम्यहम् ॥ ४ ॥
तद्वृत्तान्तमुपलब्धुं गतो वसन्तकोऽद्यापि नायाति ।

विदूषकः—(उपसृत्य)। भो[1] वअस्स, दिट्ठिआ वड्ढसि । (जेण दिण्णमित्तेण ज्जेव तेण दोहलएण ईदिसी सा णोमालिआ लदा संवुत्तेत्यादि पठति ।)

राजा—वयस्य, कः संदेहः । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । तदादेशय मार्गम् । वयमपि तदवलोकनेन चक्षुषः फलमनुभवामः ।

विदूषकः—एदु[2] एदु भवं ।

(परिक्रामतः ।)

विदूषकः—(सभयं परावृत्य । राजानं गृहीत्वा ।) भो[3], एहि । पलाअम्ह । अस्सिं क्खु लकुचपाअवे किं भूदं परिवसदि ।

राजा—धिङ्मूर्ख, विश्रब्धं गम्यताम् । कुत ईदृग्विधानामत्र संभवः ।

विदूषकः—भो[4], एसो खु फुडक्खरं एव मन्तेदि । ता जदि मम न पत्तिआअसि, ता अग्गदो भविअ सअं एव्व आअण्णेहि ।

राजा—(आकर्ण्य ।)

स्पष्टाक्षरमिदं यस्मान्मधुरं स्त्रीस्वभावतः ।
अल्पाङ्गत्वादनिर्द्दीदि मन्ये वदति सारिका ॥ ५ ॥

(उपसृत्य । ऊर्ध्वमवलोक्य ।) कथं सारिकैवेयम् ।

---

१ भो वयस्य, दिष्ट्या वर्धसे ।

२ एत्वेतु भवान् ।

३ भोः, एहि । पलायावहे । अस्मिन्खलु लकुचपादपे किं भूतं प्रतिवसाति ।

४ भोः, एष खलु स्फुटाक्षरमेव मन्त्रयति । तद्यदि मम न प्रत्येषि, तदग्रतो भूत्वा स्वयमेवाकर्णय ।

Digitized by Google

विदूषकः—(ऊर्ध्वमवलोक्य ।) [1]आः, कथं सच्चकं एव्व सारिआ । (सरोषं दण्डकाष्ठमुद्यम्य ।) आः दासीए मे धीए, किं तुए जाणिदम्। जधा सच्चं जेव मम वसन्तओ भाअदि । ता चिट्ठ मुहुत्तअम् । जाव इमिणा दण्डकट्ठेण सुपरिपक्कं विअ फलं इमादो लकुचपाअवादो भूमीए सीसं पाडयिस्सम् ।

राजा—मूर्ख, किमप्येषा रमणीयं मन्त्रयति । तत्किमिमां त्रासयसि । शृणुमस्तावत् ।

(उभावाकर्णयतः ।)

विदूषकः—(श्रुत्वा ।) [2]किं भणादि । 'सहि, कीस तए अहं इत्थ आलिहिदा । सहि, मा कुप्प मा कुप्प । जादिसो तए अअं कामएवो आलिहिदो, मए तादिसी रइत्ति' । भो, किं णेदम् ।

राजा—तर्कयामि । कयापि हृदयवल्लभोऽनुरागादभिलिख्य कामदेवव्यपदेशेन निह्नुतः । तत्सख्यापि प्रत्यभिज्ञाय वैदग्ध्यादप्रतिभिन्दानया सापि तत्रैवालिखितेति ।

विदूषकः—(छोटिकां ददाति ।) [3]भो, जुज्जदि । एव्वं एदं ।

राजा—वयस्य, तूष्णीमास्स्व । पुनरप्येषा व्याहरति ।

विदूषकः—किं[4] किम् । 'सहि, मा लज्ज। ईदिसस्स कण्णआरअणस्स अवस्सं एव्व ईदिसे वरे अहिलासेण होदव्वम्' ।

---

१ आः, कथं सत्यमेव सारिका । आः दास्याः मे पुत्रि, किं त्वया ज्ञातम् । यथा सत्यमेव मद्वसन्तको बिभेति । तत्तिष्ठ मुहूर्तम् यावदनेन दण्डकाष्ठेन सुपरिपक्वमिव फलमस्माल्लकुचपादपाद्भूम्याः शीर्षं पातयिष्यामि ।

२ किं भणति । सखि, कस्मात्त्वयाहमत्रालिखिता । सखि, मा कुप्य मा कुप्य । यादृशस्त्वयायं कामदेव आलिखितः, मया तादृशी रतिरिति । भोः, किमिदम् ।

३ भोः, युज्यते । एवमेतत् ।

४ किं किम् । सखि, मा लज्जस्व । ईदृशस्य कन्यारत्नस्यावश्यमेवेदृशे वरेऽभिलाषेण भवितव्यम् ।

Digitized by Google

विदूषकः— [1]भो वअस्स, मा तुमं पण्डिअव्वगव्वं उव्वह । हं दे एदाए मुहादो सुणिअ सव्वं वक्खाणिअस्सम् । जा एसा हिदा सा खु कण्णआ दंसणीआ ।

राजा—यद्येवं तदवहितैः श्रोतव्यम् । अस्त्यवकाशो नः कुतूहलस्य ।

विदूषकः—[2]भो, सुदं तए जं एदाए मन्तिदम् । 'सहि, वणेहि मे णलिणीवत्ताइं मुणालिआओ अ । एदेहिं अआरणे त्ताणअं सहि, किं आआसेसि' ।

राजा—वयस्य, न केवलं श्रुतम्, अभिप्रायोऽपि ज्ञात एव ।

विदूषकः—[3]भो, अज्ज वि एसा कं पि कुरकुराअदि । ता सव्वं णिअ पच्छा वक्खाणिअस्सम् । भो, एसा दासीए धीदा चउवेदो अ बम्भणो विआओ पढिदुमारद्धा ।

राजा—वयस्य, किमप्यन्यचेतसा मया नावधारितम् । तत्कमनयोक्तम् ।

विदूषकः—[4]भो, एदं एदाए पढिदम् ।

---

१ भो वयस्य, मा त्वं पाण्डित्यगर्वमुद्वह । अहं त एतस्या मुखाच्छ्रुत्वा र्वं वर्णयिष्यामि । यैषालिखिता सा खलु कन्या दर्शनीया ।

२ भोः, श्रुतं त्वया यदेतया मन्त्रितम् । 'सखि, अपनय मे नलिनीपत्राणि मृणालिकाश्च । एतैरकारण आत्मानं सखि, किमायासयसि' ।

३ भोः, अद्याप्येषा किमपि कुरकुरायते । तत्सर्वं श्रुत्वा पश्चाद्वक्ष्यिष्यामि । भोः, एषा दास्याः पुत्री चतुर्वेद इव ब्राह्मण ऋचः पठितुमारब्धा ।

४ भोः, एतदेतया पठितम् ।

Digitized by Google

दुल्लहजणाणुराओ लज्जा गुरई परव्वसो अप्पा ।
पिअसहि विसमं पिम्मं मरणं सरणं न वरमिक्कम् ॥ १ ॥

राजा—(विहस्य ।) साधु महाब्राह्मण, साधु । कोऽन्य एवमृच मभिज्ञः ।

विदूषकः—किं[1] खु दाव तए जाणिदम् ।

राजा—मूर्ख, गाथेयम् । कयापि श्लाघ्ययौवनफलमनासाद न्त्या जीवितनिरपेक्षयोक्तम् ।

विदूषकः—भो[2], किं एदेहिं वङ्कभणिदेहिं । उज्जु एव्व किं भणासि जहा मं अणासादयन्तीएत्ति । अण्णहा को अण कुसुमचाववदेसेण एवं निण्हवीआदि । (उच्चैर्विहस्य ।) अहह ।

राजा—धिङ्मूर्ख, किमुच्चैर्हसता त्वयेयमुत्रासिता, येनोड्डीय न्यत्र क्वापि गता ।

(उभौ निरूपयतः ।)

विदूषकः—भो[3], एसा खु कअलीहरं गदा । ता लहुं अ सरम्ह ।

राजा—

दुर्वारां मदनकृतां व्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम् ।

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं न वरमेकम् ॥

१ किं खलु तावत्त्वया ज्ञातम् ।

२ भोः, किमेतैर्वक्रभणितैः । ऋज्वेव किं न भणसि यथा मा नासादयन्त्योति । अन्यथा कोऽन्यः कुसुमचापव्यपदेशेनैवं निह्नूयते अहह ।

३ भोः, एषा खलु कदलीगृहं गता । तल्लघ्वनुसरावः ।

Digitized by Google

तद्भूयः शुकशिशुसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥ ६ ॥

विदूषकः—एंदु एदु भवं ।

(परिक्रामतः ।)

विदूषकः—भोो, एदं तं कदलीहरअम् । ता पविसदु भवं ।

(प्रविशतः ।)

विदूषकः—भोो, गदा दासीए धीदा । इत्थ दाव मन्दमारुदु-ोल्लिदबालकअलीहरअं पविसिअ मुहुत्तअं वीसम्ह ।

राजा—यदभिरुचितं भवते ।

(इत्युपविशतः ।)

विदूषकः—(पार्श्वान्यवलोक्य ।) भोो, एदेण खु ऊणउग्घाडिअ-ठ्वारेण ताए सारिआए पञ्जरेण होदव्वम् । एसो वि सो चित्तफल-गो । (फलकं गृहीत्वा निरूप्य । सहर्षम् ।) भो वअस्स, दिट्ठिआ ड्ढसि । एदं खु तं जं मए भणिदम् । तुमं ज्जेव एत्थ आलिहिदो। ो अण्णो कुसुमचावसमाणरूवोत्ति ।

राजा—(सहर्षं हस्तं प्रसारयति ।) सखे, उपनय ।

---

१ एत्वेतु भवान् ।

२ भोः, एतत्तत्कदलीगृहम् । तत्प्रविशतु भवान् ।

३ भोः, गता दास्याः पुत्री । अत्र तावन्मन्दमारुतोद्वेल्लितबालक-लीगृहं प्रविश्य मुहूर्तं विश्राम्यावः ।

४ भोः, एतेन खलूनोद्घाटितद्वारेण तस्याः सारिकायाः पञ्जरेण ावितव्यम् । एषोऽपि स चित्रफलहकः । भो वयस्य, दिष्ट्या वर्धसे । तत्खलु तद्यन्मया भणितम् । त्वमेवात्रालिखितः । कोऽन्यः कुसु-ाचापसमानरूप इति ।

Digitized by Google

विदूषकः—भो[1], एदं दंसयिस्सम्। सा वि कण्णआ इध जेव लिहिदा चिट्ठदि। ता किं पारितोसिएण विणा ईदिसं कण्णआरणं दंसीअदि ।

राजा—(बलाद्गृहीत्वा सविस्मयं पश्यति ।)

लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः ।
मानसमुपैति केयं चित्रगता राजहंसीव ॥ ७ ॥

(ततः प्रविशति सागरिका ।)

सागरिका—सहि[2], ण समासादिदा सा अम्हेहिं सारिआ फलहकं पि दाव इमादो कदलीहरादो गिण्हिय लहुं आगच्छम्ह

सुसंगता—सहि[3], एवं करिम्ह ।

(उभे अप्युपसर्पतः ।)

विदूषकः—भो[4] वअस्स, एसा उण रुण्णमुही आलिहिदा

सुसंगता—(आकर्ण्य ।) सहि[5], जहा वसन्तओ मन्तेदि त तक्केमि भट्टिणा वि इध जेव होदव्वम् । ता कदलीगुम्मन्तरि दाओ भविअ पेक्खम्ह दाव ।

(उभे पश्यतः ।)

---

१ भोः, एतद्दर्शयिष्यामि । सापि कन्यात्रैवालिखिता तिष्ठति तत्किं पारितोषिकेण विनेदृशं कन्यारत्नं दर्श्यते ।

२ सखि, न समासादिता सावाभ्यां सारिका । फलहकमपि वदस्मात्कदलीगृहाद्गृहीत्वा लघ्वागच्छावः ।

३ सखि, एवं कुर्वः ।

४ भो वयस्य, एषा पुना रुदितमुख्यालिखिता ।

५ सखि, यथा वसन्तको मन्त्रयति तथा तर्कयामि भर्त्राप्यं भवितव्यम् । तत्कदलीगुल्मान्तरिते भूत्वा पश्यावस्तावत् ।

Digitized by Google

सुसंगता—सँहि, दिट्ठिआ वड्ढसि। एसो दे हिअअवल्लहो[1] ं जेव्व निव्वण्णअन्तो चिट्ठदि।

सागरिका—[2]किं एवं परिहासलीलाणं इमं जणं लहुं करेसि।

विदूषकः—(राजानमुद्दिश्य।) [3]भो, अण्णं भणामि। कीस उण ण्णमुही आलिहिदा।

राजा—ननु सारिकयैव सर्वमावेदितम्।

सुसंगता—सँहि, इदं खु दंसिदं मेहाविणीए मेहावित्तणम्[4]।

विदूषकः—[5]भो वअस्स, अवि सुहाअदि दे लोअणाणम्।

सागरिका—(आत्मगतम्।) [6]हद्धी, किं एसो भणिस्सदित्ति जं वं जीविदमरणाणं अन्तरे वट्टामि।

विदूषकः—(राजानमालपन्।) [7]भो, अण्णं भणामि। अवि ह्माअदि दे लोअणाणम्।

राजा—सुखयतीति किमुच्यते। तथा हि।

कुच्छ्रेणोरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरङ्गविषमे निस्पन्दतामागता।

---

१ सखि, दिष्ट्या वर्धसे। एष ते हृदयवल्लभस्त्वामेव निर्वर्णयं- ष्ठति।

२ किमेवं परिहासलीलानामिमं जनं लघुं करोषि।

३ भोः, अन्यद्भणामि। कस्मात्पुना रुदितमुख्यालिखिता।

४ सखि, इदं खलु दर्शितं मेधाविन्या मेधाविनीत्वम्।

५ भो वयस्य, अपि सुखायते ते लोचनयोः।

६ हा धिक्, किमेष भणिष्यतीति यत्सत्यं जीवितमरणयोरन्तरे वर्ते।

७ भोः, अन्यद्भणामि। अपि सुखायते ते लोचनयोः।

Digitized by Google

मदृष्टिस्तृषितेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने ॥ ८ ।

सुखयतीति किमुच्यते ।

सागरिका—हिअअ[1], समस्सस समस्सस । मणोरहा वि एत्तिअं भूमिं ण गदा ।

राजा—अपि च ।

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्भुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥ ९ ॥

सुसंगता—सहि[2], सुदं तए ।

सागरिका—सहि[3], तुमं एव्व सुण, जाए आलेहविण्णाणं एव्व वण्णीअदि ।

विदूषकः—भो[4], जस्स उण ईदिसीओ वि फलगे आलिहिअ एवं पिअसमागमं बहु मण्णन्ति, तस्स अत्तणो उवरि को परिभवो जेण इमाए एव्व आलिहिदं अत्ताअणं ण पेक्खदि ।

राजा—(निर्वर्ण्य ।) अनया लिखितोऽहमिति यत्सत्यं ममात्मनि बहुमानः । तत्कथं न पश्यामि । यतः ।

---

१ हृदय, समाश्वसिहि समाश्वसिहि । मनोरथा अपि ते एतावतीं भूमिं न गताः ।

२ सखि, श्रुतं त्वया ।

३ सखि, त्वमेव शृणु, यस्या आलेख्यविज्ञानमेवं वर्ण्यते ।

४ भोः, यस्य पुनरीदृश्योऽपि फलक आलिख्यैवं प्रियसमागमं बहु मन्यन्ते, तस्यात्मन उपरि कः परिभवः । येनानयैवालिखितमात्मानं न पश्यति ।

Digitized by Google

भाति पतितो लिखन्त्यास्तस्या बाष्पाम्बुसीकरकणौघः ।
स्वेदोद्गम इव करतलसंस्पर्शादेष मे वपुषि ॥ १० ॥

सुसंगता—सहि,[1] तुमं एव्व एका सलाहणीआ, जाए भट्टा वि एवं मन्तीअदि ।

विदूषकः—(पार्श्वतोऽवलोक्य ।) भो,[2] एदं सरसकमलिनीदलमुणालविरइदं ताए एव्व मअणावत्थासूअअं सअणीअं लक्खीअदि ।

राजा—वयस्य, निपुणमुपलक्षितम् । तथा हि ।

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपचलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम् ॥ ११ ॥

अपि च ।

स्थितमुरसि विशालं पद्मिनीपत्रमेत-
त्कथयति न तथान्तर्मन्मथीयामवस्थाम् ।
अतिगुरुपरितापम्लापिताभ्यां यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥ १२ ॥

विदूषकः—भो,[3] अअं अवरो ताए एव्व पीणत्थणुम्हाकिलन्तकमलो मुणालहारो ।

राजा—(गृहीत्वोरसि विन्यस्य ।) अयि जडप्रकृते,

परिच्युतस्तत्कुचभारमध्या-
त्किं शोषमायासि मृणालहार ।

---

१ सखि, त्वमेवैका श्लाघनीया, यया भर्ताप्येवं मन्त्र्यते ।

२ भोः, एतत्सरसकमलिनीदलमृणालविरचितं तस्या एव मदनावस्थासूचकं शयनीयं लक्ष्यते ।

३ भोः, अयमपरस्तस्या एव पीनस्तनोष्माक्लिश्यत्कमलो मृणालहारः ।

Digitized by Google

न सूत्रतन्तोरपि तावकस्य
तत्रावकाशो भवतः किमु स्यात् ॥ १३ ॥

सुसंगता—(स्वगतम् ।) हंद्धी । गुरुआणुराअक्खित्तहिअओ असंबद्धं पि भट्टा मन्तेदुं पअत्तो । कहिं मुणालहारो, कहिं तस्स उवालम्भो । ता ण जुत्तं अदो वि अवरं उवेक्खिदुम् । भोदु । इदं दाव । (प्रकाशम् ।) सहि, जस्स कदे तुमं आगदा सोऽअं पुरदो चिट्ठदि ।

सागरिका—(सासूयम् ।) सुसंगदे, कस्स कदे अहं एत्थ आगदा ।

सुसंगता—(विहस्य ।) अइ अण्णसङ्किदे, णं चित्तफलहगस्स ।

सागरिका—(सरोषम् ।) सुसंगदे, अकुसलम्हि तव ईदिसाणं आलावाणम् । ता गमिस्सम् । (प्रस्थिता पदद्वयं ददाति ।)

सुसंगता—(सागरिकां हस्ते गृहीत्वा ।) अइ असहणे, चिट्ठ दाव मुहुत्तअम्, जाव फलहगं गिण्हिय आगच्छामि । (कदलीगृहप्रवेशं नाटयति ।)

---

१ हा धिक् । गुर्वनुरागाक्षिप्तहृदयोऽसंबद्धमपि भर्ता मन्त्रयितुं प्रवृत्तः । क्व मृणालहारः, क्व तस्योपालम्भः । तन्न युक्तमतोऽप्यपरमुपेक्षितुम् । भवतु । इदं तावत् । सखि, यस्य कृते त्वमागता सोऽयं पुरतस्तिष्ठति ।

२ सुसंगते, कस्य कृतेऽहमत्रागता ।

३ अयि अन्यशङ्किते, ननु चित्रफलहकस्य ।

४ सुसंगते, अकुशलास्मि तवेदृशानामालापानाम् । तद्गमिष्यामि ।

५ अयि असहने, तिष्ठ तावन्मुहूर्तम्, यावत्फलहकं गृहीत्वागच्छामि ।

Digitized by Google

विदूषकः—(सुसंगतां दृष्ट्वा । सभयम् ।) । [1]भो, पच्छादेहि इदं चित्तफलहगम् । एसा खु देवीए परिचारिआ सुसंगदा आगदा ।

(राजा पटान्तेन फलहकं प्रच्छादयति ।)

सुसंगता—[2]जेअदु जअदु भट्टा ।

राजा—कथमहमिहस्थो भवत्या ज्ञातः ।

सुसंगता—[3]भट्टा, ण केवलं तुमम्, अअं पि दे समं चित्तफलहगेण सव्वो वुत्तन्तो मया विण्णाओ । ता जाव गदुअ देवीए णिवेदयिस्सम् ।

विदूषकः—(अपवार्य सभयम् ।) [4]भो, सव्वं संभावीअदि । मुहरा गब्भदासी । पारितोसिएण संपीणेहि णम् ।

राजा—युक्तमभिहितम् । (सुसंगतायाः अलकान्संवृत्य ।) सुसंगते, क्रीडामात्रमेवैतत् । तथापि नाकारणे त्वया देवी खेदयितव्या । (कर्णाभरणमात्मीयं प्रयच्छति ।)

सुसंगता—(सस्मितं प्रणम्य गृह्णाति ।) [5]भट्टा, अलं सङ्काए । मए

---

१ भोः, प्रच्छादयैतच्चित्रफलहकम् । एषा खलु देव्याः परिचारिका सुसंगतागता ।

२ जयतु जयतु भर्ता ।

३ भर्तः, न केवलं त्वम्, अयमपि ते समं चित्रफलहकेन सर्वो वृत्तान्तो मया विज्ञातः । तद्यावद्गत्वा देव्यै निवेदयिष्यामि ।

४ भोः, सर्वं संभाव्यते । मुखरा गर्भदासी । पारितोषिकेण संप्रीणयैनाम् ।

५ भर्तः, अलं शङ्कया । मया भर्तुः प्रसादेन क्रीडितमेव । तत्किं कर्णाभरणेन । अयं मे गुरुः प्रसादो यत्कस्मात्त्वयाहमालिखितेति कुपिता मे प्रियसखी सागरिका । तत्प्रसादयत्वेनां भर्ता ।

Digitized by Google

भट्टिणो पसाएण कीलिदं एव्व । ता किं कण्णाभरणेण । अअं मे गुरुओ पसाओ जं कीस तए अहं आलिहिदत्ति कुविदा मे पिअसही साअरिआ । ता पसादेदु णं भट्टा ।

राजा—(सहसोत्थाय ।) दर्शय दर्शय । क्वासौ क्वासौ ।

सुसंगता—इदो इदो भट्टा[1] ।

विदूषकः—(आत्मगतम् ।) गेण्हामि[2] चित्तफलहगम् । कदा वि पुणो एदिणा कज्जं भविस्सदित्ति ।

सुसंगता—भट्टा[3], इअं सा ।

(सर्वे कदलीगृहान्निःष्क्रमणं नाटयन्ति ।)

सागरिका—(राजानं सस्पृहं दृष्ट्वा ससाध्वसम् । आत्मगतम् ।) हद्धी[4] हद्धी । एदं पेक्खिअ उरुत्थम्भेण न सक्कुणोमि इदो गन्तुम् । ता किं दाणिं एत्थ करइस्सम् ।

विदूषकः—(सागरिकां दृष्ट्वा ।) भो[5], अच्छरिअम् । ईदिसं पि णाम रूवं माणसलोए ण दीसदि । ता तक्केमि, पआवइणो वि एदं णिम्मविअ पुण्णो विम्हओ समुप्पण्णो ।

राजा—वयस्य, ममाप्येतदेव मनसि वर्तते ।

दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम् ।

---

१ इत इतो भर्ता ।

२ गृह्णामि चित्रफलहकम् । कदापि पुनरेतेन कार्यं भविष्यतीति ।

३ भर्तः, इयं सा ।

४ हा धिक् हा धिक् । एतं प्रेक्ष्योरुस्तम्भेन न शक्नोमीतो गन्तुम् । तत्किमिदानीमत्र करिष्यामि ।

५ भोः, आश्चर्यम् । ईदृशमपि नाम रूपं मनुष्यलोके न दृश्यते । तत्तर्कयामि, प्रजापतेरप्येतां निर्माय्य पूर्णो विस्मयः समुत्पन्नः ।

Digitized by Google

शिरांसि चलितानि विस्मयवशाद्भ्रुवं वेधसा
विधाय ललनां जगत्त्रयललामभूतामिमाम् ॥ १४ ॥

सागरिका—(राजानं दृष्ट्वा । सरोषम् ।) सुसंगदे, ईदिसो सो तए चित्तफलहगो आणिदो । (कोपाद्गच्छति ।)

राजा—

दृष्टिं रुषा क्षिपसि भामिनि यद्यपीमां
स्निग्धेयमेष्यति तथापि न रूक्षभावम् ।
त्यक्त्वा त्वरां व्रज तव स्खलितैरयं हि
खेदं करिष्यति गुरुर्नियतं नितम्बः ॥ १५ ॥

सुसंगता—भट्टा, अदिकोवणा क्खु एसा । ता हत्थे गिह्णिअ पसाएहि णम् ।

(राजा सानन्दं तथा करोति । हस्ते गृहीत्वा स्पर्शं नाटयति ।)

विदूषकः—भो, एसा क्खु तए अदिउच्चसिरी समासादिदा ।

राजा—वयस्य, सत्यम् ।

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः ॥ १६ ॥

अयि, प्रसीद । न खलु सखीजने युक्त एवंविधः कोपानुबन्धः ।

सुसंगता—सहि, अदिकोवणा क्खु दाणिं सि तुमम्, जा एवं भट्टिणा हत्थे गिहीदा अज्ज वि कोवं ण मुञ्चसि ।

---

१ सुसंगते, ईदृशः स त्वया चित्रफलहक आनीतः ।

२ भर्तः, अतिकोपना खल्वेषा । तद्धस्ते गृहीत्वा प्रसादयैनाम् ।

३ भोः, एषा खलु त्वयात्युच्चश्रीः समासादिता ।

४ सखि, अतिकोपना खल्विदानीमसि त्वम्, यैवं भर्त्रा हस्ते गृहीताप्यापि कोपं न मुञ्चसि ।

Digitized by Google

विदूषकः—[1]एसा क्खु अवरा देवी वासवदत्ता मे पडिभादि ।

सागरिका—(सम्भ्रमम् ।) [2]सुसंगदे, किं दाणिं एत्थ करइस्सम् ।

सुसंगता—[3]सहि, एदं तमालवीथिअं अन्तरिअ णिक्कमम्ह ।

(निष्क्रान्ते ।)

राजा—(पार्श्वान्यवलोक्य ।) वयस्य, क्व सा देवी वासवदत्ता ।

विदूषकः—[4]वअस्स, एदं क्खु मए भणिदम् । एसा क्खु अवरा देवी वासवदत्ता अदिकोवणदाए ।

राजा—धिङ्मूर्ख,

प्राप्ता कथमपि दैवात्कण्ठमनीत्वैव सा प्रकटरागा ।
रत्नावलीव कान्ता मम हस्ताङ्गंशिता भवता ॥ १७ ॥

(ततः प्रविशति वासवदत्ता काञ्चनमाला च ।)

वासवदत्ता—[5]कञ्चणमाले, अध के दूरे दाणिं सा अज्जउत्त-परिगिहीदा णोमालिआ ।

काञ्चनमाला—[6]भट्टिणि, एदं कदलीहरअं अदिक्कमिय दीसदि एव्व । ता एदु एदु देवी ।

(परिक्रामतः ।)

---

१ एषा खल्वपरा देवी वासवदत्ता मे प्रतिभाति ।

२ सुसंगते, किमिदानीमत्र करिष्ये ।

३ सखि, एतां तमालवीथीमन्तरयित्वा निष्क्रामावः ।

४ वयस्य, एतत्खलु मया भणितम् । एषा खल्वपरा देवी वासवदत्तातिकोपनतया ।

५ काञ्चनमाले, अथ कियदूर इदानीं सार्यपुत्रपरिगृहीता नवमालिका ।

६ भर्त्रि, एतत्कदलीगृहमतिक्रम्य दृश्यत एव । तदेत्वेतु देवी ।

Digitized by Google

राजा—वयस्य, केदानीं प्रिया द्रष्टव्या ।

काञ्चनमाला—भट्टिणि,[1] जहा समीवे भट्टा मन्तेदि तहा तक्केमि तुमं एव्व पडिवालयं चिट्ठदि । ता उवसप्पदु देवी ।

वासवदत्ता—(उपसृत्य ।) जेअदु[2] जअदु अज्जउत्तो ।

(विदूषकः कक्षायां फलहकं प्रक्षिप्योत्तरीयेण प्रच्छादयति ।)

वासवदत्ता—अज्जउत्त,[3] अह कुसुमिआ णोमालिआ ।

राजा—देवि, प्रथममप्यागतैरिहास्माभिस्त्वं चिरयसीति नैव दृष्टा नवमालिका । तदेहि । सहितावेव तां पश्यावः ।

वासवदत्ता—अज्जउत्त,[4] मुहराएण एव्व मए जाणिदं जहा कुसुमिदा सा णोमालिआ । ता ण गमिस्सम् ।

विदूषकः—(बाहू प्रसार्य नृत्यति ।) हीं[5] ही भो, जिदं जिदं अम्हेहिं । (नृत्यतः कक्षान्तरात्फलहकं पतति ।)

(राजा विदूषकमङ्गुल्यग्रेण तर्जयति ।)

विदूषकः—भो,[6] तुण्हीओ चिट्ठ । अहं एव्व एत्थ जाणइस्सम् ।

काञ्चनमाला—(फलहकं गृहीत्वा निरूप्य । अपवार्य च ।) पेक्खदु[7] पेक्खदु भट्टिणी किमित्थ आलिहिदंत्ति ।

---

१ भट्टिनि, यथा समीपे भर्ता मन्त्रयति तथा तर्कयामि त्वामेव प्रतिपालयंस्तिष्ठति । तदुपसर्पतु देवी ।

२ जयतु जयत्वार्यपुत्रः ।

३ आर्यपुत्र, अथ कुसुमिता नवमालिका ।

४ आर्यपुत्र, मुखरागेणैव मया ज्ञातं यथा कुसुमिता सा नवमालिका । तन्न गमिष्यामि ।

५ ही ही भोः, जितं जितमस्माभिः ।

६ भोः, तूष्णीकस्तिष्ठ । अहमेत्रात्र ज्ञास्यामि ।

७ पश्यतु पश्यतु भर्त्री किमत्रालिखितमिति ।

Digitized by Google

वासवदत्ता—(निरूप्यापवार्य ।) कञ्चणमाले, अज्जउत्तो । इअं साआरिआ । किं णेदम् ।

काञ्चनमाला—भट्टिणि, अहं पि एदं एव्व चिन्तेमि ।

वासवदत्ता—(सकोपहासम् ।) अज्जउत्त, केण एदं आलिहिदम् ।

(राजा सवैलक्ष्यं विदूषकं संज्ञापयति ।)

विदूषकः—भोदि, अत्ताथो किल दुक्खेण आलिहीअदित्ति मम वअणं सुणिअ पिअवअस्सेण एदं आलिक्खविण्णाणं दंसिदम् ।

वासवदत्ता—एदं किं अज्जवसन्तअस्स विण्णाणम् ।

राजा—देवि, अलमन्यथा संभावितेन । इयं हि मया स्वचेतसा विकल्प्य कन्याभिलिखिता । न दृष्टपूर्वा ।

विदूषकः—भोदि, सच्चं सच्चम् । सवामि बम्भणत्तणेण जइ ईदिशी कआवि अम्हेहिं दिट्ठपुव्वा ।

काञ्चनमाला—भट्टिणि, घुणक्खरं पि संभवदि जेव ।

वासवदत्ता—(अपवार्य ।) अइ, अज्ज एव वसन्तओ क्खु एसो । ण जाणासि तुमं एअस्स वङ्कभणिदीओ । (प्रकाशम् ।) अज्ज-

---

१ काञ्चनमाले, आर्यपुत्रः । इयं सागरिका । किमेतत् ।

२ भर्त्रि, अहमप्येतदेव चिन्तयामि ।

३ आर्यपुत्र, केनेदमालिखितम् ।

४ भवति, आत्माथ किल दुःखेनालिख्यत इति मम वचनं श्रुत्वा प्रियवयस्येनैतदालेख्यविज्ञानं दर्शितम् ।

५ एतत्किमार्यवसन्तकस्य विज्ञानम् ।

६ भवति, सत्यं सत्यम् । शपे ब्राह्मण्येन यदीदृशी कदाप्यस्माभिर्दृष्टपूर्वा ।

७ भर्त्रि, घुणाक्षरमपि संभवत्येव ।

८ अयि, आर्य एव वसन्तकः खल्वेषः । न जानासि त्वमेतस्य वक्रभणितीः । आर्यपुत्र, ममाप्येतच्चित्रफलहकं पश्यन्त्याः शीर्षवेदना समुत्पन्ना । तद्गमिष्याम्यहम् ।

Digitized by Google

उत्त, ममावि एदं चित्तफलहगं पेक्खन्तीए सीसवेअणा समुप्पण्णा । ता गमिस्सं अहम् । (प्रस्थिता ।)

राजा—(पटान्ते गृहीत्वा ।) देवि, प्रसीद प्रसीद ।

प्रसीदेति ब्रूयामिदमसति कोपे न घटते
करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः ।
न मे दोषोऽस्तीति त्वमिदमपि हि ज्ञास्यसि मृषा
किमेतस्मिन्वक्तुं क्षममिति न वेद्मि प्रियतमे ॥ १८ ॥

वासवदत्ता—(सविनयं पटान्तमाकर्षन्ती ।) अज्जउत्त[1], मा अण्णधा संभावेहि । सच्चकं जेव मे सीसवेअणा बाधेदि । ता गमिस्सं अहम् ।

(उभे निष्क्रान्ते ।)

विदूषकः—(पार्श्वान्यवलोक्य ।) भो वअस्स, एसा क्खु अदिक्कन्ता अम्हाणं अकालाआसकारिणी ।

राजा—धिङ्मूर्ख, कृतं परितोषेण ।

विदूषकः—कधं[2] कुविदा गदा ।

राजा—वयस्य, आभिजात्यविनिगूढो न लक्षितस्त्वया देव्याः कोपानुबन्धः । तथा हि ।

भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम् ।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः ॥ १९ ॥

तदेहि । देवीमेव प्रसादयितुं गच्छावः ।

(इति निष्क्रान्ताः सर्वे ।)

इति रत्नावलीनामप्रधाननाटिकायां द्वितीयोऽङ्कः ।

---

१ आर्यपुत्र, मान्यथा संभावय । सत्यमेव मे शीर्षवेदना बाधते । तद्गमिष्याम्यहम् ।

२ भो वयस्य, एषा खल्वतिक्रान्तास्माकमकालायासकारिणी ।

३ कथं कुपिता गता ।

Digitized by Google

तृतीयोऽङ्कः ।

(ततः प्रविशति मदनिका ।)

मदनिका—(आकाशे ।) कौसम्बक[1] कोसम्बक, कहिं दिट्ठा तए भट्टिणो सआसे कञ्चणमाला ण वेत्ति । (कर्णं दत्त्वा ।) किं भणासि । 'कोवि कालो तीए आगच्छिअ गदाए' त्ति । ता कहिं दाणिं पेक्खिस्सम् । (परिक्रम्य । अग्रतो विलोक्य ।) एसा खु कञ्चणमाला इदो एव्व आगच्छदि । ता जाव णं उवसप्पामि ।

(ततः प्रविशति काञ्चनमाला ।)

काञ्चनमाला—(सोल्लासं विहस्य ।) साहु[2] रे अमच्चवसन्त, साहु । अदिसइदो तए अमच्चजोगन्धराअणो वि इमाए संधिविग्गहचिन्ताए ।

मदनिका—(सस्मितम् ।) हला[3] कञ्चणमाले, किं विअ वसन्तएण कदं जेण एवं सो सलाहिज्जदि ।

काञ्चनमाला—सखि[4], तव किं एदिणा जाणिदेण । ण मे इमं रहस्सं रक्खिदुं पारेसि ।

मदनिका—सपथं[5] वामि भट्टिणीए चलणेहिं जदि अमुं कस्स वि पुरदो प्पकासइस्सम् ।

---

१ कौशाम्बक कौशाम्बक, क्व दृष्टा त्वया भर्तुः सकाशे काञ्चनमाला न वेति । किं भणसि । 'कोऽपि कालस्तस्या आगत्य गतायाः' इति । तत्केदानीं द्रक्ष्यामि । एषा खलु काञ्चनमालेत एवागच्छति । तदावदेनामुपसर्पामि ।

२ साधु रे अमात्यवसन्त, साधु । अतिशयितस्त्वयामात्ययौगन्धरायणोऽप्यनया संधिविग्रहचिन्तया ।

३ हला काञ्चनमाले, किमिव वसन्तकेन कृतं येनैवं स श्लाघ्यते ।

४ सखि, तव किमेतेन ज्ञातेन । न म इदं रहस्यं रक्षितुं पारयसि ।

५ शपे भट्टिन्याश्चरणाभ्यां यदीदं कस्यापि पुरतः प्रकाशयिष्यामि ।

Digitized by Google

काञ्चनमाला—जइ एवं ता कहिअस्सम्[1] । अज्ज खु मए राउलाओ पडिनिअत्तन्तीए चित्तसालिआदुआरे वसन्तअस्स सुसंगदाए सह आलावो सुदो ।

मदनिका—(सकौतुकम् ।) कीदिसो[2] ।

काञ्चनमाला—जहा[3] एवं वसन्तएण भणिदम्—'सुसंगदे, ण खु साआरिअं वज्जिअ पिअवअस्सस्स असच्छदाए अण्णं किं पि कारणम् । ता चिन्तेहि से एत्थ पडिआरम्' ।

मदनिका—तदो[4] अइ, सुसंगदाए किं भणिदम् ।

काञ्चनमाला—एदं[5] ताए भणिदम्—'अज्ज खु देवीए चित्तफलहगवुत्तन्तसङ्किदाए साआरिअं रक्खिदुं मम समप्पन्तीए जहापरिहिदं पसादीकदं तेण ज्जेव विरचिदभट्टिणीवेसं साआरिअं गिण्हिअ अहं पि कञ्चणमालाए वेसधारिणी भविअ पओसे इह आगमिस्सम्[6] ।

---

१ यद्येवं तत्कथयिष्यामि । अद्य खलु मया राजकुलात्प्रतिनिवर्तमानया चित्रशालिकाद्वारे वसन्तकस्य सुसंगतया सहालापः श्रुतः ।

२ कीदृशः ।

३ यथैवं वसन्तकेन भणितम् । सुसंगते, न खलु सागरिकां वर्जयित्वा प्रियवयस्यस्यास्वस्थताया अन्यत्किमपि कारणम् । तच्चिन्तयास्यात्र प्रतीकारम् ।

४ ततः अयि, सुसंगतया किं भणितम् ।

५ एतत्तया भणितम् । अद्य खलु देव्या चित्रफलहकवृत्तान्तशङ्कितया सागरिकां रक्षितुं मम समर्पयन्त्या यथापरिहितं प्रसादीकृतं तेनैव विरचितभट्टिनीवेषां सागरिकां गृहीत्वाहमपि काञ्चनमालाया वेषधारिणी भूत्वा प्रदोषे इहागमिष्यामि । त्वमपीहैव चित्रशालिका-

Digitized by Google

तुमं पि इह एव्व चित्तसालिआदुआरे पडिवालइसित्ति । तहिं ज्जेव माहवीलदामण्डवे भट्टिणो ताए सह समागमं करिस्सामोत्ति ।

मदनिका—(सरोषम् ।) हदा असि सुसंगदे, तुमं हदा असि जा एवं पिअपसादवच्छलं देविं वञ्चेसि ।

काञ्चनमाला—तुमं दाणिं कहिं पत्थिदा ।

मदनिका—अहं खु अस्सत्थसरीरस्स भट्टिणो कुसलवुत्तन्तं जाणिदुं गदा तुमं चिरअसीति उत्तम्मन्तीए भट्टिणीए पेसिदम्हि ।

काञ्चनमाला—अदिउज्जुआ दाणिं देवी जा एवं पत्तीअदि । एसो खु भट्टा अस्सत्थदामिहेण मअणावत्थं पच्छादअन्तो दन्तवलभीए चिट्ठदि । एहि । एदं वुत्तन्तं भट्टिणीए णिवेदम्ह ।

मदनिका—तो लहु गच्छम्ह ।

(इति निष्क्रान्ते ।)

विष्कम्भकः ।

द्वारे प्रतिपालयिष्यसीति । तत्रैव माधवीलतामण्डपे भर्तुस्तया सह समागमं करिष्याव इति ।

१ हतासि सुसंगते, त्वं हतासि यैवं प्रियप्रसादवत्सलां देवीं वञ्चयसि ।

२ त्वमिदानीं कुत्र प्रस्थिता ।

३ अहं खल्वस्वस्थशरीरस्य भर्तुः कुशलवृत्तान्तं ज्ञातुं गता त्वं चिरयसीत्युत्ताम्यन्त्या भर्त्र्या प्रेषितास्मि ।

४ अतिऋजुकेदानीं देवी यैवं प्रत्येति । एष खलु भर्तास्वस्थतामिषेण मदनावस्थां प्रच्छादयन्दन्तवलभ्यां तिष्ठति । एहि । एतं वृत्तान्तं भट्टिन्यै निवेदयावः ।

५ तल्लघु गच्छावः ।

Digitized by Google

(ततः प्रविशत्यासनस्थो राजा ।)

राजा—(निःश्वस्य ।)

संतापो हृदय स्मरानलकृतः संप्रत्ययं सह्यतां
नास्त्येवोपशमोऽस्य संप्रति पुनः किं त्वं मुधा ताम्यसि ।
यन्मूढेन मया तदा कथमपि प्राप्ता गृहीत्वा चिरं
विन्यस्तस्त्वयि सान्द्रचन्दनरसस्पर्शो न तस्याः करः ॥ १ ॥

अहो आश्चर्यम् ।

मनः प्रकृत्यैव चलं दुर्लक्षं च तथापि मे ।
कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः ॥ २ ॥

अपि च । भो भो विषमायुध,

बाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायोऽस्माद्विध एव लक्ष्यमिति यच्छोके प्रसिद्धिं गतम् ।
दृष्टे तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं
विद्धः कामिजनः शरैरशरणो नीतस्त्वयेमां दशाम् ॥ ३ ॥

न तथाहमेतदवस्थमात्मानं चिन्तयामि, यथान्तर्निगूढकोपसंरम्भाया देव्या गोचरगतां तपस्विनीं सागरिकाम् । तथा हि ।

ह्रिया सर्वस्यासौ हरति विदितास्मीति वदनं
द्वयोर्दृष्ट्वालापं कलयति कथां नात्मविषयाम् ।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमिति मे
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा ॥ ४ ॥

तद्वार्तान्वेषणाय गतश्चिरयति वसन्तकः ।

(प्रविश्य ।)

वसन्तकः—[1]ही ही भो, ही ही भो कौसम्बीरज्जलम्भेण ण तादिसो पिअवअस्सो सपरितोसो आसि जादिसो अज्ज मम सआ-

---

१ ही ही भोः, ही ही भोः, कौशाम्बीराज्यलाभेन न तादृशः प्रियवयस्यः सपरितोष आसीद्यादृशोऽद्य मम सकाशात्प्रियवचनं श्रुत्वा

Digitized by Google

सादो पिअवअणं सुणिअ भविस्सदित्ति तक्केमि । मं एव्व पडिवाल-अन्तो चिट्ठदि । ता उवसप्पामि णम् । (उपसृत्य ।) जअदु जअदु भवं समीहिदसहिदाए कज्जसिद्धीए ।

राजा—वयस्य, अपि कुशलं प्रियायाः ।

विदूषकः—[1]अचिरेण सअं एव जाणिस्सदि, जस्स पिअवअस्सो दे उपहसिदबिहप्पइबुद्धिविहवो अहं वट्टामि ।

राजा—वयस्य, न खलु किंचिन्न संभाव्यते त्वयि । तथापि कथमपि श्रोतुमिच्छामि ।

विदूषकः—(कर्णे ।) [2]एव्वमेव ।

राजा—(सहर्षम् ।) साधु वयस्य, साधु । इदं ते पारितोषिकम् । (हस्तादपनीय कटकं ददाति ।)

विदूषकः—(परिधाय । आत्मानं निर्वर्ण्य ।) [3]भो, इमं ताव सअं सोवण्णकडअमण्डिअं अत्ताणअं कडुअ बम्भणीए दंसइस्सम् ।

राजा—(विधृत्य ।) सखे, पुनर्दर्शयिष्यति । ज्ञायतां किमवसितमहः ।

विदूषकः—[4]किं ण पेक्खदि भवं । (विलोक्य ।) भो, एसो गरुआणुराअसंझावधूदिण्णसंकेदो विअ अत्थगिरिकाणणमणुसरदि भअवं सहस्सरस्सी ।

भविष्यतीति तर्कयामि । मामेव प्रतिपालयंस्तिष्ठति । तदुपसर्पाम्येनम् । जयतु जयतु भवान्समीहितसहितया कार्यसिद्धया ।

१ अचिरेण स्वयमेव ज्ञास्यति, यस्य प्रियवयस्यस्त उपहसितबृहस्पतिबुद्धिविभवोऽहं वर्ते ।

२ एवमेव ।

३ भोः, इमं तावत्स्वयं सौवर्णकटकमण्डितमात्मानं कृत्वा ब्राह्मण्यै दर्शयिष्यामि ।

४ किं न पश्यति भवान् । भोः, एष गुर्वनुरागसंध्यावधूदत्तसंकेत इवास्तगिरिकाननमनुसरति भगवान्सहस्ररश्मिः ।

Digitized by Google

राजा—अये, पर्यवसितमहः । तथा हि ।

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्रातुं रथो मे पुनरिति मनसि न्यस्तचिन्तातिभारः ।
संध्यामृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्ति-
र्व्याकृष्यावस्थितोऽस्तक्षितिभृति नयतीवैष दिक्चक्रमर्कः ॥ ५ ॥

अपि च ।

यातोऽस्मि पद्मवदने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया ।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥ ६ ॥

वयस्य, तदुत्तिष्ठ माधवीलतामण्डपं गत्वा प्रियासंकेतसमयं प्रतिपालयावः ।

विदूषकः—भो, सोहणं भणासि ।

(इत्युत्तिष्ठतः ।)

विदूषकः—[२]एसो खु बहलीकदविरलवणराईसंनिवेसो तक्खणगहिदघणपङ्कपीवरवनमहिसकिसिणछविसणिद्धो ओदरदि पुरत्थिमिरसंघओ ।

राजा—सखे, साधु दृष्टम् । तथा हि ।

पुरा पूर्वामेव स्थगयति ततोऽद्यापि विदिशः
क्रमात्क्रामन्नद्रिद्रुमपुरविभागांस्तिरयति ।
उपेतः पीनत्वं तदनु भुवनस्येक्षणफलं
तमःसंघातोऽयं हरति हरकण्ठद्युतिहरः ॥ ७ ॥

---

१ भोः, शोभनं भणसि ।

२ एष खलु बहलीकृतविरलवनराजिसंनिवेशस्तत्क्षणगृहीतघनपङ्कपीवरवनमहिषकृष्णच्छविस्निग्धोऽवतरति पुरस्तिमिरसंघः ।

Digitized by Google

विदूषकः—एंदु एदु भवं ।

(परिक्रामतः ।)

विदूषकः—भो, एदं खु संसत्तबहलपत्तपादवलदाहिं पिण्डीकदन्धआरं विअ उज्जाणम् । ता कहं इत्थ मग्गो लक्खीअदि ।

राजा—वयस्य, सुविज्ञातमेतत् । पश्य ।

पालीयं चम्पकानां नियतमयमसौ सिन्दुरः सिन्दुवारः
सान्द्रा वीथी तथेयं बकुलविटपिनां पाटलापङ्क्तिरेषा ।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेव यस्मि-
न्व्यक्तिं पन्थाः प्रयाति द्विगुणतरतमोनिह्नुतोऽप्येष चिह्नैः ॥८॥

विदूषकः—भो, एदं खु णिवडन्तमत्तमहुअरं कुसुमामोदवासिददसदिसं मसिणमणिकुट्टिमसुहाअन्तचलणसंचारसूचिदं तं एव्व माहवीलदामण्डपम् । ता चिट्ठ तुमं जाव अहं पि देवीए वेसधारिअं साअरिअं गिह्णिअ आगच्छामि ।

राजा—वयस्य, तेन हि त्वर्यतां त्वर्यताम् ।

विदूषकः—भो, मा उत्तम्म । एस आगदोम्हि । (निष्क्रान्तः ।)

राजा—यावदहमस्यां मरकतवेदिकायामुपविश्य प्रियायाः संकेतं प्रतिपालयामि । (उपविश्य ।) अहो, कामिजनस्य स्वगृहिणीसमागमं परित्यज्य जनमभिनवं प्रति पक्षपातः । तथाहि ।

---

१ एत्वेतु भवान् ।

२ भोः, एतत्खलु संसक्तबहलपत्रपादपलताभिः पिण्डीकृतान्धकारमिवोद्यानम् । तत्कथमत्र मार्गो लक्ष्यते ।

३ भोः, एतत्खलु निपतन्मत्तमधुकरं कुसुमामोदवासितदशदिशं मसृणमणिकुट्टिमसुखितचरणसंचारसूचितं तदेव माधवीलतामण्डपम् । तत्तिष्ठ त्वं यावदहमपि देव्या वेषधारिणीं सागरिकां गृहीत्वागच्छामि ।

४ भोः, मा उत्ताम्य । एष आगतोऽस्मि ।

Digitized by Google

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां संकेतस्था तथापि हि कामिनी ॥ ९ ॥

कथं चिरयति वसन्तकः । न खलु विदितः स्यादयं वृत्तान्तो देव्याः ।

(ततः प्रविशति वासवदत्ता काञ्चनमाला च ।)

वासवदत्ता—काञ्चनमाले[1], सच्चकं जेव मम वेसं कदुअ सा-अरिआ अज्जउत्तं अहिसरिस्सदि ।

काञ्चनमाला—कधं[2] अण्णधा वा भट्टिणीए णिवेदीअदि । अधवा चित्तसालिआदुआरे ठिदो वसन्तओ एव्व पच्चअं उप्पा-दइस्सदि ।

वासवदत्ता—तेण[3] हि तहिं एव्व गच्छम्ह ।

काञ्चनमाला—एदु[4] एदु भट्टिणी ।

(उभे परिक्रामतः ।)

(ततः प्रविशति कृतावगुण्ठनो वसन्तकः ।)

वसन्तकः—(कर्णं दत्त्वा ।) जधा[5] चित्तसालिआदुआरे पडिसद्दो सुणीअदि तधा तक्केमि आगदा साअरिअत्ति ।

---

१ काञ्चनमाले, सत्यमेव मम वेषं कृत्वा सागरिकार्यपुत्रमभिसरि-ष्यति ।

२ कथमन्यथा वा भट्टिन्यै निवेद्यते । अथवा चित्रशालिकाद्वारे स्थितो वसन्तक एव प्रत्ययमुत्पादयिष्यति ।

३ तेनहि तत्रैव गच्छावः ।

४ एत्वेतु भट्टिनी ।

५ यथा चित्रशालिकाद्वारे प्रतिशब्दः श्रूयते तथा तर्कयाम्यागता सागरिकेति ।

Digitized by Google

काञ्चनमाला—भट्टिणि, इअं चित्तसालिआ । जाव वसन्तअस्स सण्णं करेमि । (छोटिकां ददाति ।)

विदूषकः—(उपसृत्य । सस्मितम् ।) सुसंगदे, सुट्ठु किदो सोहिणि, एसो तए कञ्चणमालाए वेसो । साअरिआ दाव कहिं ।

काञ्चनमाला—(अङ्गुल्या निदर्शयति ।) एसा सा ।

विदूषकः—(दृष्ट्वा । सविस्मयम् ।) ईअं फुडं एव्व देवी ।

वासवदत्ता—(ससंभ्रमम् । आत्मगतम् ।) कधं पच्चभिजाणिदम्हि ।

विदूषकः—(छोटिकां ददाति ।) भोदि साअरिए, इदो इदो एहि एहि । (विहस्य काञ्चनमालां पश्यति ।)

काञ्चनमाला—(अपवार्य अङ्गुल्या तर्जयन्ती ।) हंआस, सुमरेसि एदं अत्तणो वअणम् ।

विदूषकः—तुरअदु तुरअदु भोदी साअरिआ । पुरा उग्गच्छदि भअवं मअलञ्छणो ।

(परिक्रामन्ति ।)

---

१ भट्टिनि, इयं चित्रशालिका । यावद्वसन्तकस्य संज्ञां करोमि ।

२ सुसंगते, सुष्ठु कृतः शोभिनि, एष त्वया काञ्चनमालाया वेषः । सागरिका तावत्कुत्र ।

३ एषा सा ।

४ इयं स्फुटमेव देवी ।

५ कथं प्रत्यभिज्ञातास्मि ।

६ भवति सागरिके, इत इत एह्येहि ।

७ हताश, स्मरस्येतदात्मनो वचनम् ।

८ त्वरतां त्वरतां भवती सागरिका । पुर उद्गच्छति भगवान्मृगलाञ्छनः ।

Digitized by Google

राजा—अये, उपस्थितप्रियासमागमस्यापि किमिदमत्यर्थमुत्ता-म्यति मे चेतः । अथवा साधुरयं जनापवादः ।

तीव्रः स्मरसंतापो न तथादौ बाधते यथासन्नः ।
तपति प्रावृषि सुतरामभ्यर्णजलागमो दिवसः ॥ १० ॥

विदूषकः—(कर्णं दत्त्वा ।) [1]भोदि साअरिए, एसो खु पिअवअस्सो तुमं ज्जेव उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि । ता णिवेदेमि से तुहागमणम् । (सहसोपसृत्य ।) भो, एसा आगदा साअरिआ ।

राजा—(सहसोत्थाय ।) वयस्य, क्वासौ क्वासौ ।

विदूषकः—[2]भो, एसा ।

राजा—(उपसर्पन् ।) प्रिये सागरिके,

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तथोरुयुगलं बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥ ११ ॥

वासवदत्ता—(अपवार्य ।) [3]काञ्चनमाले, एवं पि मन्तिअ अज्जउत्तो पुणो वि मं आलविस्सदि ।

विदूषकः—[4]भोदि साअरिए, वासवदत्तावअणेहिं कडुईकदा कण्णा सुहावीअन्तु तव वअणेहिं ।

---

१ भवति सागरिके, एष खलु प्रियवयस्यस्त्वामेवोद्दिश्योत्कण्ठानिर्भरं मन्त्रयति । तन्निवेदयाम्यस्मै तवागमनम् । भोः, एषागता सागरिका ।

२ भोः, एषा ।

३ काञ्चनमाले, एवमपि मन्त्रयित्वार्यपुत्रः पुनरपि मामालपिष्यति ।

४ भवति सागरिके, वासवदत्तावचनैः कटुकीकृतौ कर्णौ सुखाय्येतां तव वचनैः ।

Digitized by Google

वासवदत्ता—(अपवार्य । सरोषस्मितम् ।) कञ्चणमाले, अहं ई-[1]दिसी । वसन्तओ उण पिअंवदो ।

काञ्चनमाला—(अपवार्य ।) [2]हेदास, सुमरेसि एदम् ।

विदूषकः— (विलोक्य ।) [3]भो वअस्स, पेक्ख पेक्ख । एसो क्खु कुविदकामिणीकपोलसंणिहो पुव्वदिसं पआसन्तो उदिदो भअवं मअलञ्छणो ।

राजा—प्रिये सागरिके, पश्य ।

उदयोर्वीभृत एष त्वद्वदनापहृतकान्तिसर्वस्वः ।
फूत्कर्तुमिवोर्ध्वकरः स्थितः पुरस्तान्निशानाथः ॥ १२ ॥

अपि च । दर्शितमनेनोद्गच्छता प्रकृतिजडत्वम् । कुतः ।

किं पद्मस्य रुचं न हन्ति नयनानन्दं विधत्ते न वा
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतो
दर्पः स्यादमृतेन चेदिह तदप्येवास्ति बिम्बाधरे ॥ १३ ॥

(विलोक्य । वासवदत्ताया मुखं दृष्ट्वा सविषादम् ।) कथं देवी वासवदत्ता । वयस्य, किमेतत् ।

विदूषकः—(सभयम् ।) [4]अम्हाणं पि जीविअसंसओ ।

राजा—(उपविश्य । अञ्जलिं बद्ध्वा ।) प्रिये वासवदत्ते, प्रसीद प्रसीद ।

वासवदत्ता—(तन्मुखाभिमुखं हस्तौ प्रसार्याश्रूणि विधारयन्ती ।) [5]अज्ज-उत्त, मा एवं भण । संक्कन्ता खु इदाणिं एदे अक्खरा ।

---

१ काञ्चनमाले, अहमीदृशी । वसन्तकः पुनः प्रियंवदः ।

२ हताश, स्मरस्येतत् ।

३ भो वयस्य, पश्य पश्य । एष खलु कुपितकामिनीकपोल-संनिभः पूर्वदिशं प्रकाशयन्नुदितो भगवान्मृगलाञ्छनः ।

४ अस्माकमपि जीवितसंशयः ।

५ आर्यपुत्र, मैवं भण । संक्रान्तानि खल्विदानीमेतान्यक्षराणि ।

Digitized by Google

राजा—देवि,एवमपि प्रत्यक्षमपि दृष्टव्यलीकः किं विज्ञापयामि।

आताम्रतामपनयामि विलक्ष एष
लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना ।
कोपोपरागजनितां नु मुखेन्दुबिम्बे
हर्तुं क्षमा यदि परं करुणा मयि स्यात् ॥ १४ ॥

(पादयोः पतति ।)

वासवदत्ता—[1]अज्जउत्त, उट्ठेहि । णिल्लज्जो सो जणो जो एवं अज्जउत्तस्स हिअअं जाणिअ पुणोवि कुप्पदि ।

विदूषकः—[2]महाणुभावा खु तुमम् । ता खमीअदु से अअं एक्को अवराहो ।

वासवदत्ता—[3]वसन्तअ, णं पढमसंकेअस्स विग्घं करन्तीए मए एव्व एदस्स अवराधं कदम् ।

राजा—देवि, अहमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि ।
('आताम्रतामपनयामि विलक्ष एष लाक्षाकृताम्' इत्यादि पठित्वा पुनः पादयोः पतति ।)

वासवदत्ता—[4]अज्जउत्त, उट्ठेहि उट्ठेहि । णिल्लज्जो खु सो जणो जो अज्जउत्तस्स हिअअं जाणिअ पुणो वि कुप्पदि । ता वीसत्थो भोदु अज्जउत्तो । गमिस्सं अहम् । (इति गच्छति ।)

---

१ आर्यपुत्र, उत्तिष्ठ । निर्लज्जः स जनो य एवमार्यपुत्रस्य हृदयं ज्ञात्वा पुनरपि कुप्यति ।

२ महानुभावा खलु त्वम् । तत्क्षम्यतामस्यायमेकोऽपराधः ।

३ वसन्तक, ननु प्रथमसंकेतस्य विघ्नं कुर्वत्या मयैवैतस्यापराधः कृतः ।

४ आर्यपुत्र, उत्तिष्ठोत्तिष्ठ । निर्लज्जः खलु स जनो य आर्यपुत्रस्य हृदयं ज्ञात्वा पुनरपि कुप्यति । तद्विश्वस्तो भवत्वार्यपुत्रः । गमिष्याम्यहम् ।

Digitized by Google

काञ्चनमाला—भट्टिणि,[1] करेहि पसादम् । एवं चलणवन्दिनं उज्जिअ अवस्सं गदाए पच्छादावेण होदव्वम् ।

विदूषकः—भो,[2] उट्ठेहि । गदा देवी । ता किं अरण्णरुदिदं करेसि ।

राजा—(मुखमुन्नमय्य दृष्ट्वा ।) कथमकृत्वैव प्रसादं गता देवी ।

विदूषकः—भो,[3] किं नु न किदो पसादो जं अज्ज वि अक्खदसरीरा चिट्ठम्ह ।

राजा—धिङ्मूर्ख, किं मामुपहससि । ननु त्वत्कृत एवायं पतितोऽस्माकं महाननर्थकन्दः । कुतः !

समारूढा प्रीतिः प्रणयबहुमानादनुदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।
प्रिया मुञ्चत्यद्य ध्रुवमसहना जीवितमहो
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ॥ १९ ॥

विदूषकः—भो,[4] देवी किं करइस्सदि न जाणामि । साअरिआ उण अज्ज दुक्करं जीवदि त्ति तक्केमि ।

राजा—एवमेतत् ।

---

१ भट्टिनि, कुरु प्रसादम् । एवं चरणवन्दिनमुज्झित्वावश्यं गतायाः पश्चात्तापेन भवितव्यम् ।

२ भोः, उत्तिष्ठ । गता देवी । तत्किमरण्यरुदितं करोषि ।

३ भोः, किं नु न कृतः प्रसादो यदद्याप्यक्षतशरीरौ तिष्ठावः ।

४ भोः, देवी किं करिष्यति न जानामि । सागरिका पुनरद्य दुष्करं जीवतीति तर्कयामि ।

Digitized by Google

(ततः प्रविशति सागरिका ।)

सागरिका—दिट्ठा णाहं इमिणा विरचिदभट्टिणीवेसेण अविणीदा केणावि इमादो चित्तसालीआदो णिग्गदा । ता इदाणिं किं करइस्सम् । (साशङ्का विचिन्तयति ।)

विदूषकः—[२]किं मूढो वट्टसि । जाणेहि दाव को अस्स उवाओत्थि ।

राजा—वयस्य, ननु तमेव चिन्तयामि ।

सागरिका—[३]वरं दाणिं अहं सअं ज्जेव उब्बन्धिअ उवरदा, ण जाणिदसंकेतवुत्तन्ताए देवीए परिभूदम्हि । ता जाव माहवीलदाए पासं विरइय जहासमीहिदं करइस्सम् । (परिक्रामति ।)

राजा—वयस्य, देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि । सखे, उत्तिष्ठ । तत्रैव गच्छावः ।

(उत्तिष्ठतः ।)

विदूषकः—(कर्णं दत्त्वा ।)[४]पिट्ठे एसो खु पडिसद्दो सुणीअदि । तक्केमि गहिदपच्छाआवा पुणोवि देवी आगदा भविस्सदि ।

राजा—वयस्य, महानुभावा देवी । क्वचिदेवमपि स्यात् । तत्त्वरितं निरूप्यताम् ।

---

१ दृष्टा नाहमनेन विरचितभट्टिनीवेषेणाविनीता केनाप्यस्याश्चित्रशालिकाया निर्गता । तदिदानीं किं करिष्यामि ।

२ किं मूढो वर्तसे । जानीहि तावत्कोऽस्योपायोऽस्ति ।

३ वरमिदानीमहं स्वयमेवोद्बन्ध्योपरता, न ज्ञातसंकेतवृत्तान्तया देव्या परिभूतास्मि । तद्यावन्माधवीलतायाः पाशं विरच्य यथासमीहितं करिष्यामि ।

४ पृष्ठे एष खलु प्रतिशब्दः श्रूयते । तर्कयामि गृहीतपश्चात्तापा पुनरपि देव्यागता भविष्यति ।

Digitized by Google

विदूषकः—[1]जं भवं आणवेदित्ति । (परिक्रामति ।)

सागरिका—[2]ता जाव णं एदाए माहवीलदाए पासं करइस्सम् । (कण्ठे पाशं निक्षिप्य ।) हा तात, [3]हा अज्ज, एसा खु असरणा विपद्यामि मन्दभाइणी ।

विदूषकः—(पश्यन्नुच्चैः ससंभ्रमम् ।) [4]का पुण एसा । कहं एसा देवी वासवदत्ता उब्बन्धिअ अत्ताणअं वावादेदि ।

राजा—(ससंभ्रममुपसर्पन् ।) क्वासौ क्वासौ ।

विदूषकः—[5]भो, एसा ।

राजा—(उपसृत्य कण्ठात्पाशमपनयति ।) अयि, किमिदमकार्यं क्रियते ।

मम कण्ठगताः प्राणाः पाशे कण्ठगते तव ।
अतः स्वार्थाय यत्नोऽयं त्यज्यतां साहसं प्रिये ॥ १६ ॥

सागरिका—(आत्मगतम् । दृष्ट्वा ।) [6]अज्जउत्तो । एदं पिक्खिअ इदाणिं कदत्था भविअ सुहेण एव्व जीविदं परिच्चयिस्सम् । (प्रकाशम् ।) अज्जउत्त, मुञ्च । पराहीणो खु अअं जणो । न उण ईदिसं अवसरं पावेदि । (पुनः पाशं कण्ठे ददाति ।)

---

१ यद्भवानाज्ञापयतीति ।

२ तद्यावदेनमेताया माधवीलतायाः पाशं करिष्यामि । हा तात, हा आर्य, एषा खल्वशरणा विपद्ये मन्दभागिनी ।

३ का पुनरेषा । कथमेषा देवी वासवदत्तोद्बन्ध्यात्मानं व्यापादयति ।

४ भोः, एषा ।

५ आर्यपुत्रः । एतं प्रेक्ष्येदानीं कृतार्था भूत्वा सुखेनैव जीवितं परित्यक्ष्यामि । आर्यपुत्र, मुञ्च । पराधीनः खल्वयं जनः । न पुनरीदृशमवसरं प्राप्नोति ।

Digitized by Google

राजा—(निर्वर्ण्य सहर्षमात्मगतम् ।) कथं प्रिया सागरिका । (लतापाशमाक्षिपन् ।)

अलमलमतिमात्रं साहसेनामुना ते
त्वरितमपि विमुञ्च त्वं लतापाशमेनम् ।
चलितमिव निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं विधेहि ॥ १७ ॥

(कण्ठे कृत्वा स्पर्शं नाटयति ।) सखे, इयमनभ्रा वृष्टिः ।

विदूषकः—[1]भो, एवं णेदम् । जदि अआलवातन्दोली विव देवी वासवदत्ता आगच्छिअ अण्णदो ण णइस्सदि ।

(ततः प्रविशति वासवदत्ता काञ्चनमाला च ।)

वासवदत्ता—[2]कञ्चणमाले, तं तहा चलणवडिदं अज्जउत्तं अवधीरअन्तीए अदिणिट्ठुरं ज्जेव मए कदम् । ता इदाणिं सच्चं एव्व गदुअ अणुणइस्सम् ।

काञ्चनमाला—[3]को देवि, तुमं वज्जिअ ईदिसं चिन्तेदि । वरं सो ज्जेव दुज्जणो भोदु, मा भट्टिणी ।

(परिक्रामतः ।)

राजा—अयि मुग्धे, किमद्यापि मध्यस्थतया विफलमनोरथाः क्रियामहे ।

---

१ भोः, एवमेतत् । यद्यकालवातावलीव देवी वासवदत्तागत्यान्यतो न नेष्यति ।

२ काञ्चनमाले, तं तथा चरणपतितमार्यपुत्रमवधीरयन्त्यातिनिष्ठुरमेव मया कृतम् । तदिदानीं सत्यमेव गत्वानुनेष्यामि ।

३ को देवि, त्वां वर्जयित्वेदृशं चिन्तयति । वरं स एव दुर्जनो भवतु, मा भट्टिनी ।

Digitized by Google

काञ्चनमाला—(कर्णे दत्त्वा ।) [1]भट्टिणि, एसो खु जहा समीवे भट्टा मन्तेदि तहा तक्केमि तुमं एव्व अणुणेदुं इदो एव्वागच्छदि ।

वासवदत्ता—(सहर्षम् ।) [2]तेण हि अलक्खिदं एव्व गच्छिअ कण्ठे गहिस्सम् ।

विदूषकः—[3]भोदि साअरिए, कीस वीसत्था भविअ पिअवअस्सं न आलविसि ।

वासवदत्ता—(सविषादम् । कर्णे दत्त्वा ।) [4]काञ्चणमाले, कधं साअरिआ इदो एव्वागदा । सुणिस्सं दाव । पच्छा उपसप्पिस्सम् ।

(तथा कुरुतः ।)

सागरिका—[5]अज्जउत्त, किं इमिणा अलिक्कदक्खिण्णेण जीविआदोवि वल्लहतराए देवीए अत्ताणअं अवराहिणं करेसि ।

राजा—अयि, मिथ्यावादिनी खल्वसि । कुतः ।

श्वासोत्कम्पिनि कम्पितं कुचयुगे मौने प्रियं भाषितं
वक्त्रेऽस्याः कुटिलीकृतभ्रुणि तथा यातं मया पादयोः ।
इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं
प्रेमाबन्धविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि ॥ १८ ॥

---

१ भट्टिनि, एष खलु यथा समीपे भर्ता मन्त्रयति तथा तर्कयामि त्वामेवानुनेतुमित एवागच्छति ।

२ तेन ह्यलक्षितमेव गत्वा कण्ठे ग्रहीष्यामि ।

३ भवति सागरिके, किं विश्वस्ता भूत्वा प्रियवयस्यं नालपसि ।

४ काञ्चनमाले, कथं सागरिकेत एवागता । श्रोष्यामि तावत् । पश्चादुपसर्पिष्यामि ।

५ आर्यपुत्र, किमनेनालीकदाक्षिण्येन जीवितादपि वल्लभतराया देव्या आत्मानमपराधिनं करोषि ।

Digitized by Google

वासवदत्ता— (सरोषा सहसोपसृत्य ।) [1]अज्जउत्त, जुत्तं इदम्, सरिसं इदम् ।

राजा—(सत्रासम् ।) देवि, न खल्वकारणे मामुपालब्धुमर्हसि । सत्यं त्वामेव मत्वा वेषसादृश्यविप्रलब्धा वयमिहायाताः । तथा मे क्षम्यताम् । (पादयोः पतति ।)

वासवदत्ता—(सरोषम् ।) [2]अज्जउत्त, उट्ठेहि । किं अज्जवि आभिजादीए सेवाए दुक्खमणुहवीअदि ।

राजा—(स्वगतम् ।) कथमेतदपि श्रुतम् । सर्वथा देवीप्रसादनं प्रति निराशीभूताः स्मः । (अधोमुखस्तिष्ठति ।)

विदूषकः—[3]भोदि, तुमं किं उब्बन्धिय अत्ताणअं वावादेसित्ति वेससारिक्खमोहिदेण मए पिअवअस्सो इध आणिदो । ता किं ण पेक्खदि भोदी एनं लदापासम् । (हस्ते गृहीत्वा दर्शयति ।)

वासवदत्ता—[4]कञ्चणमाले, एदेण ज्जेव लदापासेण बन्धिअ आणेहि एणं बम्भणम् । एदं च अविणीदं कण्णकं अग्गदो करेहि ।

काञ्चनमाला—[5]जं देवी आणवेदि । (विदूषकं बध्नती ।) हदास, अणुहव दाणिं अत्तणो दुण्णअस्स फलम् । सागरिए, तुमं अग्गदो होइ ।

---

१ आर्यपुत्र, युक्तमिदम्, सदृशमिदम् ।

२ आर्यपुत्र, उत्तिष्ठ । किमद्याप्याभिजात्यया सेवया दुःखमनुभूयते ।

३ भवति, त्वं किमुद्बन्ध्यात्मानं व्यापादयसीति वेषसादृश्यमोहितेन मया प्रियवयस्योऽत्रानीतः । तत्किं न पश्यति भवत्येनं लतापाशम् ।

४ काञ्चनमाले, एतेनैव लतापाशेन बद्ध्वानयैनं ब्राह्मणम् । एतां चाविनीतां कन्यकामग्रतः कुरु ।

५ यदेव्याज्ञापयति । हताश, अनुभवेदानीमात्मनो दुर्नयस्य फलम् । सागरिके, त्वमग्रतो भव ।

Digitized by Google

सागरिका—(स्वगतम् ।) कधं अकिदपुण्णेहिं मरिदुं पि अत्तणो इच्छाए न पावीअदि[1] ।

विदूषकः—भो[2], सुमरेसु मम् ।

(सर्वानादाय निष्क्रान्ता वासवदत्ता ।)

राजा—भोः, कष्टम् ।

किं देव्याः कृतदीर्घरोषमुषितस्निग्धस्मितं तन्मुखं
त्रस्तां सागरिकां तु संभृतरुषा संतर्ज्यमानां तया ।
बद्ध्वा नीतमितो वसन्तकमहो किं चिन्तयामीत्यहो
सर्वारम्भकृतव्यथः क्षणमपि प्राप्नोमि नो निर्वृतिम् ॥ १९॥

तत्किमिदानीमिह स्थितेन । देवीसकाशमेव गच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति रत्नावलीनामप्रधाननाटिकायां तृतीयोऽङ्कः ।

---

१ कथमकृतपुण्यैर्मर्तुमप्यात्मन इच्छया न प्राप्यते ।

२ भोः, स्मर माम् ।

Digitized by Google

चतुर्थोऽङ्कः ।

(ततः प्रविशति साक्षा सुसंगता ।)

सुसंगता—[1]हा पिअसहि सागरिए, हा लज्जाउण्णि, हा उदारशीले, हा वच्छले, हा सोम्मदंसणे, कहिं गदा इदाणिं पुणो तुमं मए पेक्खिदव्वा । (इति रोदिति । ऊर्ध्वमवलोक्य ।) हा दिव्व, तए जदि असामण्णरूअसोहा तादिसी तए सा णिम्माविदा ता कीस ईदिसं अवत्थन्तरं पाविदा । इअं च रअणमाला जीविदणिरासाए ताए बम्भणस्स पडिवादेसित्ति भणिअ मम हत्थे समप्पिदा । ता जाव कं पि बम्भणं अण्णेसामि । (परिक्रम्याग्रतो विलोक्य च ।) एसो खु अज्जवसन्तओ इदो ज्जेवागच्छदि । ता जाव एदस्स ज्जेव एदं पडिवालयिस्सम् ।

(ततः प्रविशति प्रहृष्टो वसन्तकः ।)

वसन्तकः—[2]ही ही भो, अज्ज खु पिअवअस्सपसादिदाए तत्तभोदीए वासवदत्ताए बन्धणादो मोआविअ सहत्थदिण्णेहिं मोदएहिं चिरस्स दाव कालस्स उअरं मे सुपूरिदं कदम् । अण्णं च एदं

---

१ हा प्रियसखि सागरिके, हा लज्जावति, हा उदारशीले, हा वत्सले, हा सौम्यदर्शने, क्व गतेदानीं पुनस्त्वं मया प्रेक्षितव्या । हा दैव, त्वया यद्यसामान्यरूपशोभा तादृशी त्वया सा निर्मापिता तत्कुत ईदृशमवस्थान्तरं प्रापिता । इयं च रत्नमाला जीवितनिराशया तया ब्राह्मणाय प्रतिपादयेति भणित्वा मम हस्ते समर्पिता । तद्यावत्कमपि ब्राह्मणमन्विष्यामि । एष खल्वार्यवसन्तक इत एवागच्छति । तद्यावदेतस्मा एवैतां प्रतिपादयिष्यामि ।

२ ही ही भोः, अद्य खलु प्रियवयस्यप्रसादितया तत्रभवत्या वासवदत्तया बन्धनान्मोचयित्वा स्वहस्तदत्तैर्मोदकैश्चिरस्य तावत्काल-

Digitized by Google

पट्टंसुअजुअलं कण्णाभरणअं च दिण्णम् । ता जाव इदाणिं गदुअ पिअवअस्सं पेक्खामि । (परिक्रामति ।)

सुसंगता—(रुदत्युपसृत्य ।) [1]अज्ज वसन्तअ, चिट्ठ दाव मुहुत्तअम् ।

विदूषकः—[2]कधमिअं सुसंगदा । सुसंगदे, किंणिमित्तं रोईअदि । णं खु साआरिआए अच्चाहिदं किंवि सुदम् ।

सुसंगता—[3]अज्ज वसन्तअ, एदं ज्जेव णिवेदइस्सम् । सा खु तवस्सिणी देवीए उज्जेणिं नीअदत्ति वादं कदुअ उवत्थिदे अद्धरत्ते ण आणीआदि कहिं नीअत्ति ।

विदूषकः—(सोद्वेगम् ।) [4]अदिणिग्घिणी देवी ।

सुसंगता—[5]इअं च रअणमाला मम हत्थे समप्पिदा । ता गेण्हदु एदं अज्जो ।

विदूषकः—(सास्रम् ।) [6]भोदि, ण मे ईदिसे पत्थावे हत्था गेण्हिदुं पसरन्ति ।

(उभौ रुदितः ।)

स्योदरं मे सुपूरितं कृतम् । अन्यच्चैतत्पट्टांशुकयुगलं कर्णाभरणं च दत्तम् । तद्यावदिदानीं गत्वा प्रियवयस्यं प्रेक्षे ।

१ आर्य वसन्तक, तिष्ठ तावन्मुहूर्तम् ।

२ कथमियं सुसंगता । सुसंगते, किं निमित्तं रुद्यते । ननु खलु सागरिकाया अत्याहितं किंचिच्छ्रुतम् ।

३ आर्य वसन्तक, एतदेव निवेदयिष्यामि । सा खलु तपस्विनी देव्या उज्जयिनीं नीयत इति वादं कृत्वोपस्थितेऽर्धरात्रे न ज्ञायते कुत्र नीतेति ।

४ अतिनिर्घृणा देवी ।

५ इयं च रत्नमाला मम हस्ते समर्पिता । तद्गृहात्वेतामार्यः ।

६ भवति, न म ईदृशे प्रस्तावे हस्तौ ग्रहीतुं प्रसरतः ।

Digitized by Google

सुसंगता—(कृताञ्जलिः ।) [1]ताए ज्जेव अणुग्गहं करन्तो अङ्गीकरोदु एदं अज्जो ।

विदूषकः—(विचिन्त्य ।) [2]अह उवणेहि । जेण इमाए एव्व साअरिआए विरहदुक्खं अवणेमे पिअवअस्सस्स ।

(सुसंगतोपनयति ।)

विदूषकः—(गृहीत्वा रत्नमालां निर्वर्ण्य सविस्मयम् ।) [3]सुसंगदे, कुदो ईदिसस्स अलंकारस्सागमे ।

सुसंगता—[4]अज्ज, मए वि कोदुहल्लेण पुच्छिदा ज्जेवासि ।

विदूषकः—[5]तो ताए किं भणिदम् ।

सुसंगता—[6]अज्ज, दीहं णिस्ससिअ 'किं दाणिं इमाए चिन्ताए' त्ति भणिअ रोदिउं पउत्ता ।

विदूषकः— [7]भोदि, णं कहिदं ज्जेव इमाए लज्जाए । सामण्णजणदुल्लहेण इमिणा परिच्छएण सव्वहा महाकुलप्पसूदाए ताए होदव्वम् ।

---

१ तस्या एवानुग्रहं कुर्वन्नङ्गीकरोत्वेतामार्यः ।

२ अथोपनय । येनानयैव सागरिकाया विरहदुखमपनयामि प्रियवयस्यस्य ।

३ सुसंगते, कुत ईदृशस्यालंकारस्यागमः ।

४ आर्य, मयापि कौतूहलेन पृष्टैवासीत् ।

५ तत्तया किं भणितम् ।

६ आर्य, दीर्घं निःश्वस्य 'किमिदानीमनया चिन्तया' इति भणित्वा रोदितुं प्रवृत्ता ।

७ भवति, ननु कथितमेवानया लज्जया । सामान्यजनदुर्लभेनानेन परिच्छेदेन सर्वथा महाकुलप्रसूतया तया भवितव्यम् ।

Digitized by Google

सुसंगता—(दृष्ट्वा ।) अज्ज, एसो खु भट्टा देवीभवणाओ णिक्क-मिअ फलिअसिलाअलं ज्जेव पत्थिदो । ता गच्छ तुमम् । अहं पि देवीए पासवत्तिणी होमि ।

विदूषकः—एव्वम् ।

(उभौ निष्क्रान्तौ ।)

प्रवेशकः ।

(ततः प्रविशत्यासनस्थो राजा ।)

राजा—(विचिन्त्य ।)

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः ।
प्रत्यासत्तिमुपागता मम तथा देवी रुदत्या यथा
प्रक्षाल्येव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम् ॥ १ ॥

(सोत्कण्ठं निःश्वस्य ।) इदानीं देव्यां प्रसन्नायां सागरिकाचिन्तैव केवलं मां बाधते । तथा हि ।

अम्भोजगर्भसुकुमारतनुस्तथासौ
कण्ठग्रहैः प्रथमरागघनैर्विलीय ।
सद्यः पतन्मदनमार्गणरन्ध्रगर्भै-
र्मन्ये मम प्रियतमा हृदयं प्रविष्टा ॥ २ ॥

योऽपि विश्वासस्थानं वसन्तकः सोऽपि देव्या संयतस्तिष्ठति । तत्कस्याग्रे बाष्पमोक्षं करिष्ये । (निःश्वसिति ।)

(ततः प्रविशति वसन्तकः ।)

वसन्तकः—(राजानं दृष्ट्वा ।) एसो खु णिब्भरोक्कण्ठापरिक्खाम-

---

१ आर्य, एष खलु भर्ता देवीभवनान्निष्क्रम्य स्फटिकशिलातलमेव प्रस्थितः । तद्गच्छ त्वम् । अहमपि देव्याः पार्श्ववर्तिनी भवामि ।

२ एवम् ।

३ एष खलु निर्भरोत्कण्ठापरिक्षामतया स्वयंवेषेण सलावण्यतनुं स-

Digitized by Google

ताए सयंवेसेण सलावण्णतणुं समुव्वहन्तो उदिओ विअ बीआचन्दो अहिअअरं सोहदि पिअवअस्सो । ता जाव णं उवसप्पामि । (उपसृत्य ।) सोत्थि भवदे । दिट्ठिआ दिट्ठोसि देवीसहत्थगदेणावि मए पुणोवि एदेहिं एव्व अच्छीहिं ।

राजा—(दृष्ट्वा ।) अये, वसन्तकः । सखे, परिष्वजस्व माम् । (विदूषकं परिष्वज्य ।) वयस्य, वेषेणैव निवेदितस्त्वया देव्याः प्रसादः । तत्कथ्यतामिदानीं सागरिका किं वर्तते ।

(विदूषकः क्षणमधोमुखस्तिष्ठति ।)

राजा—अयि वयस्य, किं न कथयसि ।

विदूषकः—[1]भो पिअवअस्स, ण सक्कुणोमि आचक्खिदुम् ।

राजा—(साशङ्कम् ।) कथमप्रियम् । व्यक्तमुत्सृष्टं जीवितं तया । (मोहमुपागतः ।)

विदूषकः—(ससंभ्रमम् ।) [2]समस्ससदु समस्ससदु पिअवअस्सो ।

राजा—(समाश्वस्य । साश्रम् ।)

प्राणाः परित्यजत मां मम सत्पथोऽयं
हे दक्षिणा भवत मद्वचनं कुरुध्वम् ।
शीघ्रं न यात यदि तन्मुषिताः स्थ मूढा
याता सुदूरमधुना गजगामिनी सा ॥ ३ ॥

विदूषकः—[3]भो वअस्स, मा अण्णधा संभावेहि । सा खु देवीए उज्जेणिं पेसिदा । अदो मए विप्पिअं त्ति भणिअ ण कधिदम् ।

मुद्वहन्नुदित इव द्वितीयाचन्द्रोऽधिकतरं शोभते प्रियवयस्यः । तद्यावदेनमुपसर्पामि । स्वस्ति भवते । दिष्ट्या दृष्टोऽसि देवीस्वहस्तगतेनापि मया पुनरप्येताभ्यामेवाक्षिभ्याम् ।

१ भोः प्रियवयस्य, न शक्नोम्याख्यातुम् ।

२ समाश्वसितु समाश्वसितु प्रियवयस्यः ।

३ भो वयस्य, मान्यथा संभावय । सा खलु देव्योज्जयिनीं प्रेषिता । अतो मया विप्रियमिति भणित्वा न कथितम् ।

Digitized by Google

राजा—अहो निरनुक्रोशा मयि देवी । वसन्तक, केनैतदाख्यातम् ।

विदूषकः—(सास्रं निःश्वस्य ।) भो[1], सुसंगदाए मम हत्थे ताए एव्व किंवि णिमित्तं रअणमाला अणुपेसिदा ।

राजा—किमपरं मां समाश्वासयितुम् । (गृहीत्वा रत्नमालां हृदये निवेश्य ।) अहह ।

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया ।
तुल्यावस्था सखीवेयं तनुराश्वास्यते मम ॥ ४ ॥

तद्वयस्य, परिधत्स्व । येन वयमेनामपि दृष्ट्वा तावद्वृत्तिं करिष्यामः ।

विदूषकः—जं भवं आणवेदि[2] । (परिदधाति ।)

राजा—(सास्रम् ।) दुर्लभं पुनः सागरिकाया दर्शनम् ।

विदूषकः—भो[3] वअस्स, मा एव्वं भण । कआवि को वि इह संचरदि ।

(ततः प्रविशति प्रतीहारी ।)

प्रतीहारी—(राजानमुपसृत्य ।) जेअदु जअदु भट्टा[4] । भट्टा, एसो खु रुमण्णदो भाइणेओ विजयधम्मा पिअमिव किंपि णिवेदिदुकामो दुआरे चिट्ठदि ।

राजा—वसुंधरे, गच्छ । अविलम्बितं प्रवेशय ।

प्रतीहारी—जं देवो आणवेदि[5] । (इति निष्क्रम्य विजयधर्मणा सह प्रविश्य ।) विजअधम्म, एसो खु भट्टा । ता उवसप्पदु अज्जो ।

---

१ भोः, सुसंगतया मम हस्ते तयैव किमपि निमित्तं रत्नमालानुप्रेषिता।

२ यद्भवानाज्ञापयति ।

३ भो वयस्य, मैवं भण । कदापि कोऽपीह संचरति ।

४ जयतु जयतु भर्ता । भर्तः, एष खलु रुमण्वतो भागिनेयो विजयधर्मा प्रियमिव किमपि निवेदयितुकामो द्वारे तिष्ठति ।

५ यद्देव आज्ञापयति । विजयधर्मन्, एष खलु भर्ता । तदुपसर्पत्वार्यः ।

Digitized by Google

विजयधर्मा—(उपसृत्य ।) जयतु जयतु देवः । देव, दिष्ट्या वर्धसे रुमण्वतो विजयेन ।

राजा—साधु रुमण्वन्, साधु । अचिरान्महत्प्रयोजनमनुष्ठितम् । विजयधर्मन्, इत आस्यताम् ।

(विजयधर्मोपविशति ।)

राजा—विजयधर्मन्, जितः कोशलाधिपतिः ।

विजयधर्मा—देवप्रसादेन ।

राजा—विजयधर्मन्, कथमिति विस्तरतः श्रोतुमिच्छामि ।

विजयधर्मा—देव, श्रूयताम् । इतो देवादेशात्कतिपयैरेव दिनैरनेककरितुरगरथदुर्निवारपत्तिसमुदायेन गत्वा विन्ध्यदुर्गावस्थितस्य कोशलाधिपतेर्द्वारि समावेशितुमारब्धाः ।

राजा—ततस्ततः ।

विजयधर्मा—ततः कोशलाधिपतिरपि दर्पात्परिभवमसहमानो हास्तिकप्रायमशेषसैन्यं सज्जीकृतवान् ।

विदूषकः—विजयधर्मन्, लहुं आचक्खदु । वेवदि विअ मे हिअअम् ।[1]

विजयधर्मा—कृतनिश्चयश्चासौ कोशलाधिपतिः ।

योद्धुं निर्गत्य विन्ध्यादभवदभिमुखो दक्षिणादिग्विभागं
विन्ध्येनेवापरेण द्विपपतिघटनापीठबन्धेन रुन्धन् ।
वेगाद्वाणान्विमुञ्चन्समदकरिघटोत्पिष्टपत्तिं निपत्य
संप्रैच्छद्वाञ्छिताधिद्विगुणितरभसस्तं रुमण्वान्क्षणेन ॥ ९ ॥

अपि च ।

अस्त्रव्यस्तशिरस्त्रशस्त्रकषणोत्कृत्तोत्तमाङ्गे क्षणं
व्यूढासृक्सरिति स्वनत्प्रहरणोद्वेगोद्गमद्वह्निनि ।

---

१ विजयधर्मन्, लघ्वाचष्टाम् । वेपत इव मे हृदयम् ।

Digitized by Google

आहूयाजिमुखे सकोसलपतिर्भङ्गप्रतीपीभव-
न्नेकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः ॥ ६ ॥

विदूषकः—[1]जअदु जअदु भवं । जितं भवदा । (नृत्यति ।)

राजा—कोशलाधिपतेर्मृत्युरपि श्लाघ्यो यस्य शत्रवोऽपि पुरुषकारं वर्णयन्ति । ततस्ततः ।

विजयधर्मा—देव, रुमण्वानपि कोशलेषु स्वभ्रातरं ज्यायांसं स्थापयित्वा जयवर्माणं समरव्रणितं बलमनुवर्तमानो मन्दं मन्दमागच्छत्येव ।

राजा—वसुंधरे, उच्यतां यौगन्धरायणः । दीयतां मत्प्रसादोऽस्येति ।

वसुंधरा—[2]जं देवो आणवेदि । (विजयधर्मणा सह निष्क्रान्ता ।)

(ततः प्रविशति काञ्चनमाला ।)

काञ्चनमाला—[3]आणत्तम्हि देवीए जं 'कञ्चणमाले, गच्छ । एदं इन्दिआलअं अज्जउत्तस्स दंसेहि' त्ति । ता एसो खु उज्जेणीदो सव्वसिद्धि णाम इन्दिआलओ आगदो । ता पेक्खदु अज्जउत्तो ।

राजा—अस्ति नः कौतुकमैन्द्रजालिके । तच्छीघ्रं प्रवेशय ।

काञ्चनमाला—[4]जं देवो आणवेदि त्ति ।

(निष्क्रम्य पुनः पिच्छकहस्तेनैन्द्रजालिकेन सह प्रविष्टा ।)

---

१ जयतु जयतु भवान् । जितं भवता ।

२ यदेव आज्ञापयति ।

३ आज्ञप्तास्मि देव्या यत् 'काञ्चनमाले, गच्छ । एतमैन्द्रजालिकमार्यपुत्राय दर्शय' इति । तदेष खलूज्जयिन्या सर्वसिद्धिर्नामैन्द्रजालिक आगतः । तत्पश्यत्वार्यपुत्रः ।

४ यदेव आज्ञापयतीति ।

Digitized by Google

ऐन्द्रजालिकः—(पिच्छकं भ्रमयन् ।)

पणमह[1] चलणे इन्दस्स इन्दआलम्हि लद्धसक्खस्स ।

तह अज्जसंबरस्स सुपरिच्छियसव्वजगतस्स ॥ ७ ॥

काञ्चनमाला—(उपसृत्य ।) भट्टा[2], एसो खु इन्दिआलओ ।

ऐन्द्रजालिकः—जअदु[3] जअदु देवो । देव,

किं धरणीए मअङ्को आआसे महिहरो जले जलणो ।

मज्झण्हम्मि पओसो दाविज्जइ देहि आणत्तिम् ॥ ८ ॥

अहवा किं बहुणा जम्पिएण ।

मज्जपइण्णा एसा भणामि हिअएण जं सि दिट्ठव्वम् ।

तं तं दावेमि अहं गुरुणो मन्तप्पभावेण ॥ ९ ॥

विदूषकः—भो[4], ईदिसो दे अवट्टम्भो, जेण सव्वं संभावीअदि ।

राजा—काञ्चनमाले, उच्यतां देवी । यदि युष्मदीयोऽयमैन्द्रजालिको विजनीकृतश्चायमुद्देशः । तदेहि । सहितावेवैनं पश्यावः ।

---

१ प्रणमत चरणाविन्द्रस्येन्द्रजाले लब्धसाक्ष्यस्य ।
तथार्यशम्बरस्य सुपरीक्षितसर्वजगतः ॥

२ भर्तः, एष खल्वैन्द्रजालिकः ।

३ जयतु जयतु देवः । देव,

किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः ।
मध्याह्ने प्रदोषो दर्श्यते देव्याज्ञप्तिम् ॥

अथवा किं बहुना जल्पितेन ।

मध्यप्रकीर्णैषा भणामि हृदयेन यदसि द्रष्टव्यम् ।
तत्तद्दर्शयाम्यहं गुरोर्मन्त्रप्रभावेण ॥

४ भोः, ईदृशस्तेऽवष्टम्भः, येन सर्वं संभाव्यते ।

Digitized by Google

काञ्चनमाला—[1]जं भट्टा आणवेदि त्ति । (निष्क्रान्ता ।)

(ततः प्रविशति वासवदत्ता काञ्चनमाला च ।)

वासवदत्ता—[2]उज्जेणीदो आगदोत्ति अत्थि तहिं मे इन्दिआलिए बहुमाणो ।

काञ्चनमाला—[3]मैाइकुलपक्खवादो भट्टिणीए । ता एदु एदु भट्टिणी ।

वासवदत्ता—(उपसृत्य ।) [4]जेअदु जअदु अज्जउत्तो ।

राजा—देवि, बह्वनेन गर्जितम् । तदितः स्थीयताम् । पश्यामः ।

(वासवदत्तोपविशति ।)

राजा—भद्र, प्रस्तूयतामिन्द्रजालम् ।

ऐन्द्रजालिकः—[5]जं देवो आणवेदि त्ति । (नाट्यं बहुविधं कृत्वा पिच्छकं भ्रमयन् ।)

हरिहरबम्भप्पमुहे देवे दावेमि देवराअं च ।
गगणम्मि सिद्धचारणसुरवहुसत्थं च णच्चन्तम् ॥ १० ॥

ता पेक्खदु देवो ।

राजा—(आसनादवतरन्नूर्ध्वमवलोक्य । सविस्मयम् ।) **अहो आश्चर्यम्।**

---

१ यद्भर्ताज्ञापयतीति ।

२ उज्जयिनीत आगत इत्यस्ति तस्मिन्म ऐन्द्रजालिके बहुमानः ।

३ मातृकुलपक्षपातो भर्त्र्याः । तदेत्वेतु भर्त्री ।

४ जयतु जयत्वार्यपुत्रः ।

५ यदेव आज्ञापयतीति ।

हरिहरब्रह्मप्रमुखान्देवान्दर्शयामि देवराजं च ।
गगने सिद्धचारणसुरवधूसार्थं च नृत्यन्तम् ॥

तत्पश्यतु देवः ।

Digitized by Google

एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं
दोर्भिर्दैत्यान्तकोऽयं सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः ।
एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः ॥११॥

विदूषकः—(अपवार्य ।) दासीए[1] पुत्ता इन्दिआलिआ, किं देवेहिं अच्छराहिं वा । जदि दे इमिणा परितुट्ठेण कज्जं ता साआरिअं दंसेहि ।

(प्रविश्य ।)

वसुंधरा—भट्टा[2], अमच्चजोगन्धराअणो विण्णवेदि—'एसो खु विक्कमबाहुणो पहाणो अमच्चवसुभूदी बब्भव्वकञ्चुइणा सह आगदो । ता अरुहदि देवो इमस्सिं जेव सुन्दरं मुहुत्तं पेक्खिदुम् । अहंपि कज्जसेसं समापिअ आगदो एव्व ।'

वासवदत्ता—अज्जउत्त[3], चिट्ठदु दाव इन्दिआलिओ । माउलघराओ अमच्चवसुभूदी आगदो । तं दाव पेक्खदु अज्जउत्तो ।

राजा—यथाह देवी । भद्र, विश्रम्यताम् ।

ऐन्द्रजालिकः—जं[4] देवो आणवेदि । परं एक्को खिड्डको अवस्सं देवेण पिक्खिदव्वो ।

---

१ दास्याः पुत्र ऐन्द्रजालिक, किं देवैरप्सरोभिर्वा । यदि तेऽनेन परितुष्टेन कार्यं तत्सागरिकां दर्शय ।

२ भर्तः, अमात्ययौगन्धरायणो विज्ञापयति—'एष खलु विक्रमबाहोः प्रधानोऽमात्यवसुभूतिर्बाभ्रव्यकञ्चुकिना सहागतः । तत्पश्यैनम् । अयमेव सुन्दरो मुहूर्तो द्रष्टुमहमपि कार्यशेषं समाप्यागत एव ।'

३ आर्यपुत्र, तिष्ठतु तावदैन्द्रजालिकः । मातुलगृहादमात्यो वसुभूतिरागतः । तं तावत्पश्यत्वार्यपुत्रः ।

४ यदेव आज्ञापयति । परमेकः खेलोऽवश्यं देवेन द्रष्टव्यः ।

Digitized by Google

राजा—एवम् । द्रक्ष्यामि ।

वासवदत्ता—[1]काञ्चणमाले, देहि से पारितोसिकम् ।

काञ्चनमाला—[2]जं देवी आणवेदि ।

(ऐन्द्रजालिकेन सह निष्क्रान्ता ।)

राजा—वसन्तक, प्रत्युद्गम्य प्रवेशय वसुभूतिम् ।

वसन्तकः—[3]जं देवो आणवेदि ।

(ततः प्रविशति वसुभूतिर्बाभ्रव्यो वसन्तकश्च ।)

वासवदत्ता—[4]एदु एदु अमच्चो वसुभूदी ।

वसुभूतिः—अहो वत्सेश्वरस्यानुभावः । इह हि

आक्षिप्तान्नवकुञ्जरेण तुरगान्निर्विण्णयन्बल्लवा-
न्संगीतध्वनिना हृतः क्षितिभुजां गोष्ठीषु तिष्ठन्क्षणम् ।
सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेऽप्यहो
द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः ॥ १२ ॥

कञ्चुकी—अद्य चिरात्स्वामिनं द्रक्ष्यामीति यत्सत्यमानन्दाति-शयेनान्यदवस्थान्तरमनुभवामि । कुतः ।

विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशा-
दविस्पष्टां दृष्टिं तरयति पुनर्बाष्पसलिलैः ।
स्खलद्वर्णा वाणी भवति नितरां गद्गदतया
जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥१३॥

---

१ काञ्चनमाले, देह्यस्य पारितोषिकम् ।

२ यद्देव्याज्ञापयति ।

३ यद्देव आज्ञापयति ।

४ एत्वेत्वमात्यो वसुभूतिः ।

Digitized by Google

विदूषकः—(अग्रतो भूत्वा ।) एदु एदु अमच्चो वसुभूदी ।

वसुभूतिः—(विदूषकस्य कण्ठे रत्नमालां दृष्ट्वा । अवधार्य ।) बाभ्रव्य, सैवेयं रत्नमाला देवेन राजपुत्र्याः प्रस्थानकाले दत्ता ।

कञ्चुकी—अमात्य, अस्ति सादृश्यम् । तत्किं वसन्तकं पृच्छामि प्राप्तिमस्याः ।

वसुभूतिः—मा मैवम् । महति राजकुले न दुर्लभो भूषणानां संवादः ।

विदूषकः—भो, एसो महाराओ । ता उपसप्पदु अमच्चो ।

वसुभूतिः—(उपसृत्य ।) विजयतां महाराजः ।

राजा—(सादरम् ।) अभिवादये । वयस्य, आसनमासनम् ।

विदूषकः—एदं आसणम् । उपविसदु अज्जो ।

राजा—वसुभूते, उपविश ।

कञ्चुकी—जयत्वार्यपुत्रः ।

राजा—बाभ्रव्य, इत आस्यताम् । (पृष्ठे हस्तं ददाति ।)

(सर्वे उपविशन्ति ।)

विदूषकः—एसा खु देवी पणामं करेदि ।

वसुभूतिः—आयुष्मति, वत्सराजसदृशं पुत्रमाप्नुहि ।

कञ्चुकी—बाभ्रव्यः प्रणमति ।

राजा—अमात्य वसुभूते, अयि कुशलं तत्रभवतः सिंहलेश्वरस्य ।

---

१ एत्वेत्वमात्यो वसुभूतिः ।

२ भोः, एष महाराजः । तदुपसर्पत्वमात्यः ।

३ इदमासनम् । उपविशत्वार्यः ।

४ एषा खलु देवी प्रणामं करोति ।

Digitized by Google

वसुभूतिः—(ऊर्ध्वमवलोक्य निःश्वस्य च ।) देव[1], न जानामि । किमपि विज्ञापयामि । (रुदन्नधोमुखस्तिष्ठति ।)

वासवदत्ता—(सविषादमात्मगतम् ।) हद्धी, हद्धी । किंवि अम्ज्जवसुभूदी कधइस्सदि ।

राजा—कथय किमेतत् । आर्य, आकुल इव मेऽन्तरात्मा ।

कञ्चुकी—अमात्य, चिरमपि स्थित्वा कथनीयम् । तत्कथ्यताम् ।

वसुभूतिः—(साक्षम् ।) एष मन्दो दुर्भाग्यो विज्ञापयामि । यासौ तत्रभवता सिंहलेश्वरदुहिता रत्नावली नाम वासवदत्तामायुष्मतीमुपसृत्य देवाय प्रार्थिता सती न दत्ता ।

राजा—देवि, किमेतदलीकमेव त्वन्मातुलामात्यः प्रलपति ।

वासवदत्ता—(स्मित्वा ।) अज्जउत्त[2], ण जाणीअदि को अलिअं मन्तेदि ।

विदूषकः—तेंदो[3] ताए किं वुत्तम् ।

वसुभूतिः—ततो युष्मदन्तिकमानीयमाना सती वाहनभङ्गात्सागरे मग्ना ।

वासवदत्ता—हीं[4] देव्व, । बहिणीए, कहिं तुमं पिक्खुदव्वा । ता देहि मे पडिवअणम् । (इति मूर्च्छिता पतति ।)

राजा—समाश्वसिहि समाश्वसिहि । दुरवगाहा गतिर्दैवस्य । वाहनभङ्गान्निपतितौ नन्वेतावेव निदर्शनम् ।

---

१ हा धिक्, हा धिक् । किमप्यमात्यवसुभूतिः कथयिष्यति ।

२ आर्यपुत्र, न ज्ञायते कोऽप्यलीकं मन्त्रयते ।

३ ततस्तस्याः किं वृत्तम् ।

४ हा दैव । भगिनि, कुत्र त्वं प्रेक्षितव्या । तद्देहि मे प्रतिवचनम् ।

Digitized by Google

वासवदत्ता—कुदो इत्तिका भागधेया[1] ।

राजा—वाभ्रव्य, कथय किमेतदिति । नावगच्छामि ।

कञ्चुकी—देव, श्रूयताम् ।

(नेपथ्ये ।)

हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः ।
कुर्वन्क्रीडामहीध्रं सजलजलधरश्यामलैर्धूमपातै-
रेष क्षोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥१४॥

राजा—(ज्वलनं दृष्ट्वा ससंभ्रममुत्तिष्ठन् ।) कथमन्तःपुरेऽग्निः । कष्टम् । दग्धा देवी वासवदत्ता ।

देवीदाहप्रवादोऽसौ योऽभूल्लावणिके पुरा ।
करिष्यन्निव तत्सत्यं मन्ये वह्निः समुत्थितः ॥ १५ ॥

हा प्रिये वासवदत्ते ।

वासवदत्ता—परित्तायदु[2] परित्तायदु अज्जउत्तो ।

राजा—कथमिहस्था देवी विस्मृता । अलमतिसंभ्रमेण ।

वासवदत्ता—अज्जउत्त[3], णहि अत्तणो कारणे एवं भणामि । सा खु मए णिग्घिणाए इध संयदा चिट्ठदि सागरिका । ता तं परित्तायदु अज्जउत्तो ।

राजा—एष गच्छामि ।

---

१ कुत एतावद्भागधेयम् ।

२ परित्रायतां परित्रायतामार्यपुत्रः ।

३ आर्यपुत्र, नह्यात्मनः कारणादेवं भणामि । सा खलु मया निर्घृणयेह संयता तिष्ठति सागरिका । तत्तां परित्रायतामार्यपुत्रः ।

Digitized by Google

वसुभूतिः—देव, किमकारण इदं क्रियते ।

कञ्चुकी—देवि, युक्तमुक्तं वसुभूतिना ।

विदूषकः—(राजानमुत्तरीये गृहीत्वा ।) [1]वअस्स, मा खु एवं साहसं करेहि ।

राजा—(उत्तरीयमाक्षिप्य ।) मूर्ख, सागरिका विपद्यते । किमर्थमद्यापि प्राणा धार्यन्ते । (धूमाभिभवं नाटयति ।)

विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥ १६ ॥

वासवदत्ता—[2]कधं मे दुक्करकारिणीए वअणेण एवं अज्जवसिदं अज्जउत्तेण । ता अहंपि एदं एव्व अणुगमिस्सम् ।

वसुभूतिः—ममाद्दष्टराजपुत्रीविपत्तेरिहैव युक्तमात्मानमाहुतीकर्तुम् ।

कञ्चुकी—स्वामिन्, किमकारणे भरतकुलं तुलामारोप्यते । अथवा किं प्रलपितेन । (भक्तिसादृश्यमाचरति ।)

(ततः प्रविशति निगडसंयता सागरिका ।)

सागरिका—(दिशोऽवलोक्य ।) [3]दिट्ठिआ समन्तदो पज्जलिदो अज्ज करिस्सदि दुःखावसारणं भअवं हुदासणो ।

---

१ वयस्य, मा खल्वेवं साहसं कुरु ।

२ कथं मे दुष्करकारिण्या वचनेनैवमध्यवसितमार्यपुत्रेण । तदहमप्येतमेवानुगमिष्यामि ।

३ दिष्ट्या समन्ततः प्रज्वलितोऽद्य करिष्यति दुःखापसारणं भगवान्हुताशनः ।

Digitized by Google

राजा—इहासन्नहुतवहा वर्तते सागरिका । तत्त्वरितमेनां संभावयामि । (उपसृत्य ।) अयि, किमद्यापि संभ्रमे स्वस्थयैव वर्तते ।

सागरिका—(राजानं सस्पृहं दृष्ट्वा । स्वगतम् ।) कधं अज्जउत्तो । एअं पिक्खिअ पुणोवि मे जीविदाभिलासो संवुत्तो । अज्जउत्त, परित्ताहि परित्ताहि ।

राजा—अयि प्रियतमे भीरु,

मुहूर्तमपि सह्यतां बहल एष धूमोद्गमो
हहा धिगिदमंशुकं ज्वलति त्वत्स्तनात्प्रच्युतम् ।
मुहुः स्खलसि किं, कथं निगडसंयता ते गति-
र्न यामि भवतीं विना प्रियतमेऽवलम्बस्व माम् ॥ १७॥

(कण्ठे गृहीत्वा निमीलिताक्षः स्पर्शं नाटयति ।) अहो क्षणान्मेऽपगतोऽयं संतापः । अयि, समाश्वसिहि समाश्वसिहि ।

व्यक्तं लग्नोऽपि भवतीं न दहत्येव पावकः ।
यतः संतापमेवायं स्पर्शस्ते हरति प्रिये ॥ १८ ॥

(उन्मीलिताक्षो दिशोऽवलोक्य सागरिकां मुक्त्वा ।) अहो, महदाश्चर्यम् । क्वासौ प्रज्वलनहुताशनस्तदवस्थमेतदन्तःपुरम् । कथमचिन्त्यरूपमेवम् ।

वासवदत्ता—(राज्ञः शरीरं परामृश्य ।) [२]दिट्ठिआ अक्खतसरीरो अज्जउत्तो ।

बाभ्रव्यः—इदानीं जीविताः स्मः ।

राजा—वसुभूतिरयम् ।

---

१ कथमार्यपुत्रः । एतं प्रेक्ष्य पुनरपि मे जीविताभिलाषः संवृतः । आर्यपुत्र, परित्रायस्व परित्रायस्व ।

२ दिष्ट्याक्षतशरीर आर्यपुत्रः ।

Digitized by Google

वसुभूतिः—विजयतां देवः ।

राजा—विदूषकोऽयम् ।

विदूषकः—जेअदु[1] जअदु भवं ।

राजा—स्वप्नोऽयमिति भाति । किमिदमिन्द्रजालम् ।

विदूषकः—भो[2], मा संदेहं करेहि । इन्दिआलं एव्व । एदं च तेण दासीपुत्तेण इन्दिआलिएण कहिदं जधा एक्को अवस्सं खेडुको तुम्हेहिं पिक्खिदव्वोत्ति । ता एदं तम् ।

राजा—देवि, इयं त्वद्वचनादस्माभिरिहानीता सागरिका ।

वासवदत्ता—(सस्मितम् ।) अज्जउत्त[3], जाणिदम् ।

वसुंधरा—(सागरिकां निर्वर्ण्यापवार्य च ।) बाभ्रव्य, सदृशीयं राजपुत्र्या ।

बाभ्रव्यः—अमात्य, ममाप्येतदेव मनसि वर्तते ।

वसुभूतिः—(निरूप्य ।) देव, इयं कुतः कन्यका ।

राजा—देवी जानाति ।

वासवदत्ता—अज्जउत्त[4], एसा सागरादो पाविदित्ति भणिअ अमच्चयौगन्धराअणेण मम हत्थे णिक्खिदा । अदो एव्व साअरिइत्ति सद्दावीअदि ।

---

१ जयतु जयतु भवान् ।

२ भोः, मा संदेहं कुरु । इन्द्रजालमेव । एतच्च तेन दासीपुत्रेणैन्द्रजालिकेन कथितं यथैकोऽवश्यं खेलो युष्माभिर्द्रष्टव्य इति । तदेष सः ।

३ आर्यपुत्र, ज्ञातम् ।

४ आर्यपुत्र, एषा सागरात्प्राप्तेति भणित्वामात्ययौगन्धरायणेन मम हस्ते निक्षिप्ता । अत एव सागरिकेत्याह्वयते ।

Digitized by Google

राजा—(आत्मगतम् ।) यौगन्धरायणेन न्यस्ता । कथमसौ ममाप्यनिवेद्य किंचित्करिष्यति ।

वसुभूतिः—(अपवार्य ।) बाभ्रव्य, यथा वसन्तकस्य कण्ठे रत्नमाला, (सागरिकां निर्दिश्य ।) अस्याश्च सागरात्प्राप्तिः, तथा सैवेयं सिंहलेश्वरदुहिता । (प्रकाशम् ।) आयुष्मति, न खलु राजपुत्री रत्नावली त्वमेनामवस्थामुपगता ।

सागरिका—(वसुभूतिं विलोक्य ।) हा[1], कहं अमच्चवसुभूई ।

वसुभूतिः—(साश्रु म् ।) हा, हतोऽस्मि मन्दभाग्यः । (भूमौ निपतति ।)

सागरिका—(वसुभूतेरुपरि निपत्य ।) हा[2] ताद, हा अमच्च, कहिं । देहि देहि मे पडिवअणम् ।

वासवदत्ता—(साश्रु ससंभ्रमं च ।) अज्ज[3] कञ्चुइ, इअं सा मम बहिणी रअणमाला ।

कञ्चुकी—देवि, इयं सा रत्नावली । (रत्नावलीमालिङ्ग्य ।) समस्ससदु[4] समस्ससदु बहिणिका ।

राजा—कथमुदात्तराजप्रभवस्य सिंहलपतेर्विक्रमबाहोरात्मजेयम् ।

विदूषकः—(आत्मगतम् । रत्नमालां स्पृशन् ।) पैढमं[5] जेव्व मए जाणिदं जहा ण ईदिसो सामण्णजणपरिच्छओ होदित्ति ।

---

१ हा, कथममात्यवसुभूतिः ।

२ हा तात, हा अमात्य, कुत्र । देहि देहि मे प्रतिवचनम् ।

३ आर्य कञ्चुकिन्, इयं सा मम भगिनी रत्नमाला ।

४ समाश्वसितु समाश्वसितु भगिनी ।

५ प्रथममेव मया ज्ञातं यथा नेदृशः सामान्यजनपरिच्छदो भवति ।

Digitized by Google

वसुभूतिः—आयुष्मति, समाश्वसिहि समाश्वसिहि । नन्वियं ज्यायसी ते भगिनी दुःखमास्ते । तत्परिष्वजस्वैनाम् ।

वासवदत्ता—(साम्रा । बाहू प्रसार्य ।) एहि एहि अदिणिट्ठुरे, इदाणिं पि दाव बन्धुसिणेहं दंसेहि ।[1]

सागरिका—कैदावराहा देवीए अहं ण सक्कुणोमि मुहं दंसिदुम् ।[2]

वासवदत्ता—(राजानमपवार्य ।) अज्जउत्त, लज्जामि खु इमिणा णिसंसत्तणेण । ता अवणेहि से बन्धणम् ।[3]

राजा—(सपरितोषम् ।) यथाह देवी । (सागरिकां मुञ्चति ।)

वासवदत्ता—अज्जउत्त, अमच्चयौगन्धराअणेण एत्तिअं खलु कालं दुज्जणीकदम्हि । जेण जाणिअ ण आचक्खिदम् ।[4]

(ततः प्रविशति यौगन्धरायणः ।)

यौगन्धरायणः—

देव्या मद्वचनात्तथाभ्युपगतः पत्युर्वियोगस्तदा
सा देवस्य कलत्रसंघटनया दुःखं परं स्थापिता ।
तस्याः प्रीतिमयं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया ॥१९॥

(क्षणं विचिन्त्य ।) अथ वा किं क्रियते । ईदृशमिदमत्यन्तमाननीयेष्वपि निरुपरोधवृत्ति स्वामिनो भक्तव्रतम् । (विलोक्य ।) देवश्चायम् ।

---

१ एह्येहातिनिष्ठुरे, इदानीमपि तावद्बन्धुस्नेहं दर्शय ।

२ कृतापराधा देव्या अहं न शक्नोमि मुखं दर्शयितुम् ।

३ आर्यपुत्र, लज्जे खल्वनेन नृशंसत्वेन । तदपनयास्या बन्धनम् ।

४ आर्यपुत्र, अमात्ययौगन्धरायणेनैतावन्तं खलु कालं दुर्जनीकृतास्मि । येन ज्ञात्वा नाख्यातम् ।

Digitized by Google

यावदुपसर्पामि । (उपसृत्य ।) जयतु जयतु स्वामी । (पादयोर्निपत्य ।) देव, क्षम्यतां क्षम्यताम् । यद्देवस्यानिवेद्य मयैतत्कृतम् ।

राजा—यौगन्धरायण, सर्वमेव नाहमवगच्छामि । तत्कथय किमनाख्याय त्वया कृतम् ।

यौगन्धरायणः—(कृताञ्जलिः ।) देव, श्रूयताम् । इयं सिंहलेश्वरदुहिता सिद्धादेशेनादिष्टा । योऽस्याः पाणिं ग्रहीष्यति स सार्वभौमो राजा भविष्यति । तत्सत्यतयास्माभिः स्वाम्यर्थं याच्यमानेनापि देवेन सिंहलेश्वरेण देव्या वासवदत्तायाः खेदं परिहरता यदा न दत्ता,

राजा—तदा किम् ।

यौगन्धरायणः—तदा लावणिके देवी दग्धेति प्रसिद्धिमासाद्य तदन्तिकं बाभ्रव्यः प्रहितः ।

राजा—यौगन्धरायण, अतः परं श्रुतं मया । अथ देव्या हस्ते किमनुचिन्त्य स्थापिता ।

विदूषकः—वयस्स[1] भो, अणाचक्खिअं पि एदं जाणीअदि ज्जेव । अन्तेउरे दाव पदिवसन्ती सुहेण तव अवस्सं ज्जेव दिट्ठिगोअरे णिवडिस्सदित्ति ।

राजा—(विहस्य ।) यौगन्धरायण, गृहीताभिप्रायोऽसि वसन्तकेन ।

यौगन्धरायणः—यदाज्ञापयति देवः ।

राजा— (यौगन्धरायणस्य छोटिकां दत्त्वा ।) इन्द्रजालवृत्तान्तोऽपि भवत्प्रयुक्त एव ।

---

१ वयस्य भोः, अनाख्यातमप्येतज्ज्ञायत एव । अन्तःपुरे तावत्प्रतिवसन्ती सुखेन तवावश्यमेव दृष्टिगोचरे निपतिष्यतीति ।

Digitized by Google

यौगन्धरायणः—देव, एवम् । अन्यथान्तःपुरे बद्धायाः सागरिकायाः कुतो दर्शनम्, अदृष्टायाश्च वसुभूतिना सह कुतः परिज्ञानम् । (विहस्य ।) परिज्ञातायाश्च भगिन्याः संप्रति यथाकरणीये देवी प्रमाणमिति ।

वासवदत्ता—(सस्मितम् ।) अज्ज,[1] फुडं ज्जेव मे किं ण भणासि, जहा पडिवादेहि से रअणावलिं त्ति ।

विदूषकः—भोदी,[2] सुट्ठु तए जाणिदो अमच्चाभिप्पाओ ।

वासवदत्ता—एहि[3] रअणावलिए, एहि । दाणिं मम बहिणिआणुरूपं भोदु । (रत्नावलीं स्वैराभरणैरलंकृत्य हस्ते गृहीत्वा राजानमुपसर्पन्ती ।) अज्जउत्त, पडिच्छ एदम् ।

राजा—(सपरितोषं हस्तौ प्रसार्य ।) को देव्या दानं न बहु मन्यते ।

वासवदत्ता—अज्जउत्त,[4] खु एदाए दूरे पिदुणो कुलम् । ता तधा करेहि जधा न बन्धुजणं सुमरेदि । (समर्पयति ।)

राजा—यथाह देवी ।

विदूषकः—(नृत्यन् ।) हीं[5] ही भो, तैलोक्कस्सापि संपदं हत्थीभूदं पिअवअस्सस्स ।

---

१ आर्य, स्फुटमेव मे किं न भणसि, यथा प्रतिपादयास्मै रत्नावलीमिति ।

२ भवति, सुष्ठु त्वया ज्ञातोऽमात्याभिप्रायः ।

३ एहि रत्नावलि, एहि । इदानीं मम भगिन्यनुरूपं भवतु । आर्यपुत्र, प्रतीच्छैनाम् ।

४ आर्यपुत्र, खल्वेतस्या दूरे पितुः कुलम् । तत्तथा कुरु यथा न बन्धुजनं स्मरति ।

५ ही ही भोः, त्रैलोक्यस्यापि संपद्धस्तीभूता प्रियवयस्यस्य ।

Digitized by Google

वसुभूतिः—आयुष्मति, स्थाने देवीशब्दमावहसि ।

कञ्चुकी—देव, इदानीं सफलः परिश्रमः संवृत्तः ।

यौगन्धरायणः—तदुच्यतां किं ते भूयः प्रियमुपकरोमि ।

राजा—अतः परमपि प्रियमस्ति ।

यातो विक्रमबाहुरात्मसमतां, प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनीलाभाज्जिताः कोशलाः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मिन्करोमि स्पृहाम् ॥२०॥

तथापीदमस्तु ।

उर्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनां राजमुख्याः ।
आकल्पान्तं क्रियासुः क्रममुपरचितं संगतं सज्जनाश्च
निर्विश्लेषावकाशं पिशुनजनवचोवर्जनाद्वज्रलेपम् ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति रत्नावलीनामप्रधाननाटिकायां चतुर्थोऽङ्कः ।

समाप्तेयं नाटिका ।

Digitized by Google

Digitized by Google

श्लोकानुक्रमः ।

अअ पढमं महुमासो	१।१४	दुल्लहजणाणुराओ	२।१
अध्वानं नैकचक्रः	३।५	दुर्वारां मदनकृतां	२।६
अनङ्गोऽयमनङ्गस्य	१।२१	दृशः पृथुतरीकृताः	२।१४
अम्भोजगर्भसुकुमार	४।२	दृष्टिं रुषा क्षिपसि	२।१५
अलमलमतिमात्रं	३।१७	देवि त्वन्मुखपङ्कजेन	१।२४
अस्तापास्तसमस्तभासि	१।२२	देवीदाहप्रवादोऽसौ	४।१५
अस्त्रव्यस्तशिरस्त्र	४।६	देव्या मद्वचनात्तथा	४।१९
अस्मिन्प्रकीर्णपटवास	१।११	द्वीपादन्यस्मादपि	१।५
आक्षिप्तान्नवकुञ्जरेण	४।१२	धारायन्त्रविमुक्तसंतत	१।१०
आताम्रतामपनयामि	३।१४	नष्टं वर्षधरैर्मनुष्य	२।३
आरम्भेऽस्मिन्स्वामिनो	१।६	पणमह चलणे इन्दस्स	४।७
उदयपटान्तरितमियं	१।२३	परिच्युतस्तत्कुचभार	२।१३
उदयोर्वीभृत एष	३।१२	परिम्लानं पीनस्तनजघन	२।११
उद्दामोत्कलिकां	२।४	पादाग्रस्थितया मुहुः	१।१
उद्यद्विद्रुमकान्तिभिः	१।१६	पानीयं चम्पकानां नियत	३।८
उर्वीमुद्दामसस्यां जनयतु	४।२१	पुरा पूर्वामेव स्थगयति	३।७
एष ब्रह्मा सरोजे	४।११	प्रणयविशदां दृष्टिं वक्त्रे	३।९
औत्सुक्येन कृतत्वरा	१।२	प्रत्यग्रमज्जनविशेष	१।१९
कण्ठाश्लेषं समासाद्य	४।४	प्रसीदेति ब्रूयामिदमसति	२।१८
कण्ठे कृत्वावशेषं	२।२	प्राणाः परित्यजत	४।३
किं देव्याः कृतदीर्घरोष	३।१९	प्राप्ता कथमपि दैवात्	२।१७
किं धरणीए मअङ्को	४।८	बाणाः पञ्च मनोभवस्य	३।३
किं पद्मस्य रुचं न हन्ति	३।१३	भाति पतितो लिखन्त्या	२।१०
कीर्णैः पिष्टातकौघैः	१।९	भ्रूभङ्गे सहसोद्गतेऽपि	२।१९
कुसुमसुकुमारमूर्ति	१।१८	मज्जपइण्णा एसा	४।९
कुसुमाउहपिअदूअअं	१।१२	मनः प्रकृत्यैव चलं	२।२
कृच्छ्रेणोरुयुगं व्यतीत्य	२।८	मम कण्ठगताः प्राणाः	३।१६
क्रोधेद्धैर्दृष्टिपातैर्मुहु	१।३	मुहूर्तमपि सह्यतां	४।१७
तीव्रः स्मरसंतापो	३।१०	मूले गण्डूषसेकासव	१।१७

Digitized by Google

यातो विक्रमबाहुरात्म	४।२०	श्रीहर्षो निपुणः कविः	१।४
यातोऽस्ति पद्मवदने	३।६	श्वासोत्कम्पिनि कम्पितं	३।१८
योद्धुं निर्गत्य विन्ध्यात्	४।५	संतापो हृदय स्मरानल	३।१
राज्यं निर्जितशत्रु योग्य	१।८	समारूढा प्रीतिः प्रणय	३।१५
लीलावधूतपद्मा	२।७	सव्याजैः शपथैः प्रियेण	४।१
विअसिअवउलामोअओ	१।१३	स्थितमुरसि विशालं	२।१२
विधायापूर्वपूर्णेन्दु	२।९	स्पष्टाक्षरमिदं यस्मात्	२।५
विरम विरम वह्ने	४।१६	स्पृष्टस्त्वयैष दयिते	१।२०
विवृद्धिं कम्पस्य प्रथयति	४।१२	स्रस्तः स्रग्दामशोभां	१।१५
विश्रान्तविग्रहकथो	१।७	हरिहरब्रम्भप्पमुहे	४।१०
व्यक्तं लग्नोऽपि भवतीं	४।१८	हर्म्याणां हेमशृङ्ग	४।१४
शीतांशुर्मुखमुत्पले	३।११	ह्रिया सर्वस्यासौ हरति	३।४
श्रीरेषा पाणिरप्यस्याः	२।१६		

Digitized by Google

संस्कृत.	कि.रु.आ.	ट.आणे.
कालिदासकृत मेघदूत (मल्लिनाथकृत टीका.)...	०–८	१
कालिदासकृत कुमारसंभव (कित्ता)... ...	२–०	३॥
कालिदासकृत रघुवंश (कित्ता)... ...	२–०	३॥
कालिदासकृत अभिज्ञानशाकुंतल नाटक (राघवभट्टकृत टीका.)	१–४	३
अन्नंभट्टकृत तर्कसंग्रह (दी. व इंग्रजी भा.) ...	०–६	१
सप्तश्लोकी गीता. „	०–१	०॥
शंकरानंदी गीता.	५–०	६
श्रीमद्भगवद्गीता (फारच बारीक टैपांनीं छा.)...	०–१	॥
पंचरत्नी गीता (कित्ता).	०–७	१
सप्तशती प्रयोगांसहित (कित्ता).	०–१	१
मुंबई युनिव्हर्सिटीचे संस्कृत म्याट्रिक्युलेशन पेपर व त्यांचीं उत्तरें सन १८६२–१८८२. ...	१–१	१
नारायणपंडितकृत हितोपदेश.	०–८	१
„ (इंग्रेजी टीपांसहित)... ...	१–०	१॥
ऋतुसंहार काव्य...	०–४	१
„ (इंग्रजी टीपांसहित).	०–६	१
श्रीहर्षकृत रत्नावली नाटक...	०–६	१॥
विदुरनीति.	०–६	०॥
शब्दरूपावलिः (निर्णयसागरी)—हींत एकंदर निरनिराळ्या प्रकारच्या ८४ शब्दांचीं रूपें चालवून दाखविलीं आहेत.	०–१	०॥
लघुकौमुदी...	०–६	१
लौगाक्षिभास्करविरचित तर्ककौमुदी.	०–२	॥
भारविकविकृत किरातार्जुनीय...	२–८	४
नलचंपू.	२–०	४
भट्टीकाव्य.	३–०	४
मेघदूत इंग्रजी टीपांसहित...	०–१२	१॥
अध्यात्मरामायण मध्यम टैपाचे.	०–१२	१॥
शिवगीता (साधी) मोठे टैपांनीं छा. ...	०–४।	१

Digitized by Google